श्रीः

आनोभद्रीयं सूक्तम्

(ऋक्संहिता १।८९)

श्रीक्षितीशचन्द्र-चट्टोपाध्याय-देवशर्मणा

पदपाठ—वेङ्कटमाधवव्याख्यान-स्कन्दस्वामिभाष्य—महीधरभाष्य
सायणभाष्य—काश्यपक्षितीशचन्द्रभाष्यादिभिः संयोजितम् ।

श्रीविश्वनाथचट्टोपाध्यायन
८१ नं श्यामवाजार ष्ट्रीट्, कलिकाता-४
वास्तव्येन मञ्जूषायां प्रकाशितम् ।
वसन्तपञ्चमी, २००८

PREFACE

The hymn beginning with *ā no bhadrāh kratavo yantu vis'vatah* is one of the most inspiring hymns in the Vedas. It is presented here with the Padapāṭha of S'ākalya, the earliest and briefest running commentary on the Rigveda, the paraphrase of Veṅkaṭamādhava, the commentary of Skandasvāmin, the fairly elaborate commentary of Mahīdhara and the very elaborate commentary of Sāyaṇa who comes rather late in the list. As Mahīdhara's commentary is based on Uvaṭa's and as Skandasvāmin's Bhāṣya differs but little from Haradatta's Vyākhyā, we have not included the two latter in this book, but have merely given extracts from them. We have added a commentary of our own bringing out the significance of each expression of this sublime hymn. An attempt has also been made to present the correct texts of the commentaries, to trace the quotations contained therein to their sources and to throw light on some obscure points. Some of the grammatical and other peculiarities of the commentaries have been discussed in the notes.

The moral of the hymn may be mentioned here. The devotee must never forget that "it is vanity to wish to live long, and to be careless to live well." Our life must not be swayed by impulses and passions, but we must live a godly life and "endeavour to conquer ourselves, and daily to grow stronger and make a further progress in holiness." (देवानां सख्यमुपसेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे). Enjoyment is not to be shunned, we should enjoy life to its fullest extent, but the enjoyment must be that of the Gods and not that of brutes, it must never transgress *Dharma*, it must always be धर्माविरुद्ध (कुर्वन्नेवेह कर्माणि

जिजीविषेच्छतं समाः—ईशोपनिषद्, धर्मार्थकामाः सममेव सेव्या वो ह्येकसक्तः स जनो जघन्यः—महाभारतम्).

The last stanza in which Aditi is identified not only with all the Gods but with nature as well, with all that has been and shall be born, gives a poetic statement of the pantheistic idea which is characteristic of the Vedas. It reminds one forcibly of the Egyptian Goddess Neith, the Great Mother, at one of whose temples in the ancient city of Sais was inscribed in Greek :

Ego: eimi pan to gegonos kai on kai esomenon kai ton emon peplon oudeis po: thne:tos apekalupsen.

'I am all that is and that was andthat shall be, and no mortal hath lifted my veil.'

It is interesting to note in this connexion that though the conception of the Earth as a mother and of Heaven as a father (Skt. *Dyaus pitar*, Gk. *Zeu pater*, Lat. *Ju:piter*) as found in stanza 4 of our hymn (तन्माता पृथिवी तत् पिता द्यौः) is common to Vedic and Greek mythology, the Egyptians regarded the earth as male and the sky as female.

We shall deem our labours amply rewarded if this little book enables our readers to approach the hymn with the reverence due to it, inspires them to live a life of holiness and helps scholars to make a critical and comparative study of the Indian commentaries on the Vedas.

Manjuṣa Office
Calcutta—4
31st January, 1952

KSHITISHA CHANDRA CHATTOPADHYAYA

श्रीः

आनोभद्रीयं सूक्तम्

(ऋक्संहिता १।८९)

आ नो भद्राः क्रतवो यन्तु विश्वतो-
ऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्-
नप्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥

आ । नः । भद्राः । क्रतवः । यन्तु । विश्वतः ।
अदब्धासः । अपरिऽइतासः । उत्ऽभिदः ।
देवाः । नः । यथा । सदम् । इत् । वृधे । असन् ।
अप्रऽआयुवः । रक्षितारः । दिवेऽदिवे ॥ १ ॥

वेङ्कटमाधव-व्याख्यानम् । आयन्तु [नः] अस्मान् [विश्वतः] सर्वतः [भद्राः क्रतवः] भंजनीयानि कर्माणि [अदब्धासः] असुरैरहिंसितानि [अपरीतासः] अपरिवृतानि च [उद्भिदः] फलोद्भेदनानि ।

देवाः यथा [नः] अस्माकम् [सदमित्] सदैव [वृधे] वर्धनाय [असन्] स्युः [अप्रायुवः] अप्रगच्छन्तः रक्षितारः च [दिवेदिवे] अहन्यहनि ॥१॥

कास्त्रप-क्षितीशचन्द्र-भाष्यम् । आ न इति । **भद्राः** शुभाः कल्याणकरा इति यावत् । **अदब्धासः** अदब्धाः अहिंसिताः, केनापि हिंसितुमशक्याः, विकारहेतुसद्भावेऽप्यविकृताः, समासन्नेऽपि विपत्तिसमयेऽमलिना इत्यर्थः । **अपरीतासः** अपरीताः अपरिगताः केनाप्यतिक्रमितुमशक्याः सर्वातिशायिन्य इति यावत् । **उद्भिदः** सर्वानन्तरायांश्छित्त्वा भित्त्वा च प्रसरणशीलाः अप्रतिहतप्रसरा इति यावत् । **क्रतवः** बुद्धयः **विश्वतः** सर्वतः स्वतः शास्त्राद्यनुशीलनतः जागतभावपर्यवेक्षणतश्च अस्मान् **आयन्तु** आगच्छन्तु प्राप्नुवन्त्वित्यर्थः । बुद्धिरेव परमं बलं मनुजानाम् । अत एव "बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्" इत्युद्घोषयन्ति नीतिशास्त्रविदः । अमीभिः क्रतुभिर्वयमप्यदब्धा अपरीता उद्भिदो भवेमेति ध्वन्यते । उद्भित्त्वं च भक्तैः प्रार्थ्यते देवैश्च प्रसादीक्रियते । तथाच तैत्तिरीयब्राह्मणे [२।४।७।३] श्रूयते—"नृणामह प्रणीरसत् । अग्र उद्भिन्दतामसत्" इति । "अयं .. नृणां मनुष्याणां प्रणीः प्रकर्षेण नेता असत् भवतु । अह अपि च उद्भिन्दताम् विरोधिजनोद्भेदनं कुर्वतां पुरुषाणाम्मध्येऽयमग्र असत् प्रथमप्रवृत्तौ भवतु" इति तद्व्याख्यानम् । **यथा** येन बुद्धिसद्भावेन **देवाः** इन्द्राद्या अस्माभिर्यथाशास्त्रं यागादिभिस्तोषिता वर्द्धिताश्च **सदमित्** सदैव प्रतिपलमेव **वृधे** वर्धनाय सम्पदामिति शेषः । **असन्** भवेयुः, तथा **दिवेदिवे** प्रतिदिनमेव **अप्रायुवः** अनपायिनः अप्रमत्ता इत्यर्थः, अत्यन्तं यत्नवन्त इति यावत् । **रक्षितारः** पालकाः असन्नित्यनुषङ्गः, भवेयुः । देवा नः सुभया बुद्ध्या संयुञ्जन्तु तया च बुद्ध्या समुपेता वयं देवानां पूजनं कुर्याम, तेन च प्रीतानां देवानां सान्द्रेण प्रसादेन पुत्रपौत्रादिकं धनसम्पदादिकं चानुदिनं नोऽभिवर्धतां संसारसुलभाभ्यश्च विपत्परम्प-

राभ्यः सदैव नस्त्राणमुपजायताम्। कथमर्थकः कथाशब्द इत्थमर्थकश्चेत्थाशब्दो वेदेषूपलभ्यते। एतद्वैपरीत्येन सदार्थकः सदम्-शब्दोऽपि श्रुतिषु श्रूयते ॥ १ ॥

स्कन्दस्वामिभाष्यम्। ...नः अस्मान् भद्राः कल्याणाः क्रतवः यज्ञाः आयन्तु आगच्छन्तु विश्वतः सर्वतः। स्वतः सम्बन्धिनश्च आत्मनः सम्बन्धिनां च पुत्रादीनामस्माकं यज्ञा उपनयन्त्वित्यर्थः। कीदृशाः? उच्यते। अदब्धासः अहिंसिताः। यज्ञविध्वंसिभी रक्षआदिभिरविगुणा[1] इत्यर्थः। अपरीतासः अपरिगताः। अन्यैरप्राप्तपूर्वा इत्यर्थः। उद्भिदः उद्भिन्नामैकाहः। तत्प्रभृतयः। अथवा उद्भिन्दन्ति फलानीत्युद्भिदः जनयितारः फलानामित्यथः। कथं पुनरायन्तु? उच्यते। देवाः नः यथा सदम् इत्। सदमिति सदाशब्दपर्यायः। इच्छब्द एवार्थे। सदैव वृधे वर्धनाय असन् भवयुः। अप्रायुवः अप्रमोषितारः आयषः। जीवितस्य चानपहर्तार इत्यर्थः। अथवा प्रायुव इति अयतेर्गतिकर्मण इदं रूपम्। अप्रगन्तारः नित्यसन्निहिता इत्यर्थः। अथवा प्रायुव इति यौते रूपम्। अन्यैरर्थैरप्रश्रिता[2] बुद्धिर्येषां ते अप्रायुवः। अनाक्षिप्तचेतस्का इत्यर्थः। अत्यन्तं यत्नवन्त इत्यर्थः। रक्षितारश्च दिवेदिवे अहन्यहनि ॥१॥

महीधरभाष्यम्। ... क्रतवः यज्ञाः सङ्कल्पा वा नः अस्मान् प्रति आयन्तु आगच्छन्तु। यज्ञकर्तारो वयं भवेमेत्यर्थः। कीदृशाः क्रतवः? भद्राः भन्दनीयाः। भदि कल्याणे। कल्याणकारिणः। तथा विश्वतः[3] अदब्धासः सर्वतोऽनुपहिंसिताः[4]। निर्विघ्ना इत्यर्थः। अपरीतासः न परीताः

[1] Should we read ०रविहता?

[2] The correct reading would appear to be अप्रमिश्रिता, which is found in Haradatta ; cf. यु मिश्रणामिश्रणयोः.

[3] विश्वतः सर्वतः स्वतः सम्बन्धिनश्च। उवट-हरदत्तौ।

[4] सगुणा इत्यर्थः। हरदत्तः।

अपरीताः अपरिगता अज्ञाताः[1] केनचित्। फलानुमेया इत्यर्थः। उद्भिदः उद्भिन्दन्ति प्रकटयन्तीति उद्भिदः उद्भेत्तारः। यज्ञान्तराणां प्रकटीकर्तार इत्यर्थः[2]। किञ्च यथा येन प्रकारेण देवाः नः अस्माकं सदमित् सर्वत्र वृधे वृद्धैः असन् भवन्ति। तथा ऋतव आयन्त्वित्यर्थः। सदमिदित्यव्ययं सदार्थे। कीदृशाः देवाः? अप्रायुवः प्रकर्षेणायुवन्ति प्रमाद्यन्ति ते[3] प्रायुवः। यौतेः क्विप्। तुगभाव आर्षः। न प्रायुवः अनलसाः। अस्माकं वृद्धैः भवन्त्वित्यर्थः। तथा दिवेदिवे अहन्यहनि प्रत्यहं रक्षितारः पालकाः ॥१॥

सायणभाष्यम्। आ नो भद्रा इति दशर्चं पञ्चमं सूक्तं गोतमस्यार्षं वैश्वदेवम्। आदितः पञ्चर्चः सप्तमी च जगत्यः, षष्ठी स्वस्ति न इन्द्रेत्येषा विराट्स्थाना। "नवकौ वैराजस्त्रैष्टुभश्च" [अनु० ९।५] इत्युक्तलक्षणयोगात्। अष्टम्याद्यास्तिस्रस्त्रिष्टुभः। तथा चानुक्रान्तम्। "आ नो दश वैश्वदेवं तु पञ्चाद्याः सप्तमी च जगत्यः षष्ठी विराट्स्थाना" इति। अग्निष्टोमे वैश्वदेवशस्त्र उत्तमावजमेतत्सूक्तं वैश्वदेवनिविद्धानीयम्। सा तु प्रकृतौ विकृतौ च वैश्वदेवशस्त्रस्य परिधानीया। तथा च सूत्रितम्। "आ नो भद्राः क्रतवो यन्तु विश्वत इति नव वैश्वदेवम्" [आ० श्रौ० सू० ५।१८] इति। "अदितिर्द्यौरदितिरन्तरिक्षमिति परिदध्यात्सर्वत्र वैश्वदेवे" [आ० श्रौ० सू० ५।१८] इति च। ब्राह्मणं च भवति। "सदैव पञ्चजनीयया परिदध्यात्" [ऐ० ब्रा० १३।७] इति। महाव्रते निष्केवल्य एतत्सूक्तम्। तथा च पञ्चमारण्यके सूत्रयते। "आनोभद्रीयं च तस्य स्थाने" [ए० आ० ५।३।२] इति।

[1] अन्यैरप्राप्तपूर्वाः। ह०

[2] उद्भिद उद्भिन्ना एकाहाहीनप्रभृतयः। अथवा उद्भिन्दन्ति फलानीत्युद्भिदः। जनयितारः क्रतूनामित्यर्थः। ह०

[3] Should we read प्रमाद्यन्तीति ?

नोऽस्मान् क्रतवोऽग्निष्टोमादयो महायज्ञा विश्वतः सर्वस्मादपि दिग्भागादायन्तु। आगच्छन्तु। कीदृशाः क्रतवः? भद्राः। समीचीन-फलसाधनत्वेन कल्याणा भजनीया वा। अदब्धासः। असुरैरहिंसिताः। अपरीतासः। शत्रुभिरपरिगताः। अप्रतिरुद्धा इत्यर्थः। उद्भिदः। शत्रूणामुद्भेत्तारः। ईदृशाः क्रतवोऽस्मांस्तथागच्छन्तु। अप्रायुवोऽप्रगच्छन्तः स्वकीयं रक्षितव्यमपरित्यजन्तः अत एव दिवे दिवे प्रतिदिवसं रक्षितारो रक्षां कुर्वन्तः। एवंगुणविशिष्टाः सर्वे देवा नोऽस्माकं सदमित् सदव वृधे वर्धनाय यथा असन् भवेयुस्तथागच्छन्त्विति सम्बन्धः[1]। अदब्धासः। दम्भु दम्भे। दम्भो हिंसा[2]। निष्ठायां "यस्य विभाषा" [७।२।१५] इतीट्प्रतिषेधः। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम्। अपरीतासः। इण् गतौ। पूर्ववत्कर्मणि निष्ठा। उभयत्र "आज्जसेरसुक्" [७।१।५०]। वृधे। वृधु वृद्धौ। सम्पदादिलक्षणो भावे क्विप्।

[1] This is found only in a few MSS. and is rather cumbrous. **यथा** might have been placed before **अप्रायुवः**. Max Müller reads : **वृधे वर्धनायासन् भवन्तु.** In that case S. missed **यथा.**

[2] In the Dhātupāṭha we find **दम्भु दम्भे** but we are none the wiser for the explanation. The printed Mādhavīya Dhātuvṛtti reads **दम्भु दम्भने** and adds **दम्भो लोकार्जवार्थमेव कर्मानुष्ठानम्.** Probably the correct reading is **दम्भु दम्भे। दम्भो लोकावर्जनार्थमेव कर्मानुष्ठानम्।** Kṣīrasvāmin and Maitreya Rakṣita read **दम्भु दम्भे** but do not vouchsafe any explanation. Bhaṭṭoji reads **दम्भने.** As **दम्भ** is generally used in the sense of 'fraud', 'hypocrisy'* **दम्भे** in the Dhātupāṭha probably means 'deception'. And *dab* in

---

* Cf. इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति॥

"सावेकाचः०" [६।१।१६८] इति विभक्तेरुदात्तत्वम् । असन् । अस भुवि । लेटड्डागमः । "बहुलं छन्दसि" [२।४।७३] इति शपो लुगभावः [1] । तस्याङित्त्वात् "श्नसोरल्लोपः" [६।४।१११] इत्यकारलोपाभावः । अप्रायुवः ।

the Avesta is used in the sense of 'deceiving'. *Davāiθyāo* means 'of the deceiver'. The Greek verb *atembo*: means to maltreat, to afflict, to perplex ; passive with gen., to be bereft or cheated of a thing. In the Nighaṇṭu **दभ्नोति** is read in the list of **गतिकर्मक** and **वधकर्मक** roots. The original meaning of the root, therefore, seems to have been to harm with guile, then on the one hand to kill and on the other to deceive. In RV. i.25.14 :

न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम् ।
न देवमभिमातयः ॥

it is just possible that both the senses are present—'whom deceivers do not wish to *deceive*, whom those who hurt people do not *seek to hurt*, the God whom those who lie in wait cannot harm'.

[1] **"बहुलं छन्दसि" इति शपो लुगभावः.**—In **लेट्** we get the proper Vikaraṇa. **अस्** being an **अदादि** root, the Vikaraṇa is o. But if there be no Vikaraṇa, then **अस्** will be changed into **भू** acc. to **अस्तेर्भूः** ii. 4. 52 before the modal sign of the subjunctive i.e. **अट्** which is Ārdhadhātuka, being neither **तिङ्** nor **शित्**. The easier course would have been to invoke the aid of **छन्दस्युभयथा** iii. 4. 117. Under RV. i. 9. 5 S. says : **अस भुवि । लेट् । तिप् । इतश्च लोप इतीकारलोपः । लेटोऽडाटावित्यडागमः । अदिप्रभृतिभ्यः शपः इति शपो लुक् । आगमा अनुदात्ता इत्यटोऽनुदात्तत्वात् धातुस्वर एव ।** Here also S. evidently takes the help of **छन्दस्युभयथा**, otherwise before the **अ** of **अट्** the Vikaraṇa could not have been dropped.

असत् is accented in connexion with **यथा**. **यद्वृत्तान्नित्यम्** viii. 1.66.

इण् गतौ[1]। अस्मात्प्रपूर्वात् "छन्दसीणः" [उ० १।२] इत्युण्प्रत्ययः। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम्। जसि "जसादिसु छन्दसि वावचनम्" [७।३।१०१।१] इति गुणस्य विकल्पितत्वादभावे[2] तन्वादित्वादुवङ् [६।४।७७।१] ॥ १ ॥

[1] S. follows the Padapāṭha but the change of उ to उव् presents difficulties. Skandasvāmin, Haradatta and others have proposed allternative derivations from *yu* also. Similarly acc. to Western scholars *aprā-yu* 'assiduous' is from *yu* to separate, keep away (Macdonell, *Vedic Grammar*, p. 292, f. n. 13). In that case we may say: अनित्यमागमशासनम् इति तुकोऽभावः। सर्वे विधयश्छन्दसि विकल्प्यन्त इति वा, क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति वा अचि श्नुधातुभ्रुवामित्युवङ्, न पुनरोः सुपीति यण्। यद्वा छन्दस्युभयथा [६।४।८६] इति सूत्रेण सर्वत्रैव छन्दसि इयङ्उवङौ यणश्च विकल्पो भवति. Macdonell has missed *aprāyuvah*. Wackernagel (*Alt-indische Grammatik* Vol III says: Nouns with radical or apparently radical *i* and *u* are declined almost throughout like derivative *i* and *u* stems, occasionally, however, like the radical nouns in *ī/iy*, *ū/uv* (section 66, b); and from *yu* to drive, move (*yuyoti*) he quotes *aṃhoyuvah* 'pressed hard', *aprāyuvah* 'not lazy'.

[2] विकल्पितत्वात्तदभावे is more usual.

देवानां भद्रा सुमतिर्ऋजूयतां
देवानां रातिरभि नो नि वर्तताम्।

देवानां सख्यमुप सेदिमा वयं

देवा न आयुः प्र तिरन्तु जीवसे ॥ २ ॥

देवानाम्। भद्रा। सुऽमतिः। ऋजुऽयताम्।

देवानाम्। रातिः। अभि। नः। नि। वर्तताम्।

देवानाम्। सख्यम्। उप। सेदिम। वयम्।

देवाः। नः। आयुः। प्र। तिरन्तु। जीवसे ॥ २ ॥

वेङ्कटमाधवव्याख्यानम्। देवानां [भद्रा] भजनीया सुमतिः [ऋजूयताम्] ऋजुमिच्छताम् देवानाम् [रातिः] दानम् [नः] अस्मान् अभिनिवर्तताम्। देवानाम् सख्यम् [उपसेदिम] उपगच्छम वयम्। देवा नः आयुः [प्रतिरन्तु] वर्धयन्तु [जीवसे] जीवनाय ॥ २ ॥

काश्यपक्षितीशचन्द्रभाष्यम्। देवानामिति। **ऋजूयताम्** आर्जवमाचरताम् ऋजुमार्गेण गच्छतामित्यर्थः। **देवानाम् भद्रा** कल्याणी **सुमतिः** प्रसादाभिमुखी बुद्धिर्मङ्गलं नः कृषीतेति शेषः। ऋजूयतां देवानामित्युक्तेर्ऋजूयतामस्माकमृजुमार्गेणैवान्तरेणैवान्तरायादिकं क्षेमं वितनोत्वित्यर्थः। **देवानां रातिः** दानम् नः अस्मान् **अभि** समन्तात् **नि** नितरां **वर्तताम्** सन्तिष्ठताम्। प्रीता देवाः पुत्रमित्रकलत्रादिभिर्गवाश्वहस्तिहिरण्यादिभिश्चास्मान् योजयन्तु। **वयम् देवानाम् सख्यम्** मैत्रीम् **उपसेदिम** आसादयम। मानुषा अपि वयं मानुष्यकमतिक्रान्ता देवोचितगुणगण-

सम्पन्ना देवानां सौहृद्यमनुभवेम। **देवाः जीवसे** जीवनाय **नः** अस्माकम् **आयुः** जीवनकालं **प्रतिरन्तु** प्रकर्षेण वर्धयन्तु। यद्वा, **नः** अस्मान् **आयुः** जीवनकालं **प्रतिरन्तु**। अन्तर्भूतण्यर्थोऽत्र तौदादिक-स्तॄधातुर्द्रष्टव्यः। प्र-तारयन्तु। जीवनकालस्य देवैर्विहितस्य शतवर्षसम्मितस्य पारं नयन्तु, पूर्णायुषोऽस्मान् विदधत्वित्यर्थः। यद्यप्यायुषो वर्धनं स्वत एव जीवनायैव भवति तथापि जीवसे इत्युक्ते नं केवलं वयं लोहकारभस्त्रेव श्वसन्तोऽवतिष्ठेमहि परं शोभनैरुपकरणैरुपेताः शोभनान् भोगान् भुञ्जानाः शोभनानि कर्माण्यनुतिष्ठन्तः परमार्थत एव जीवेमेत्यर्थः ॥ २ ॥

निरुक्तम्। देवानां वयं सुमतौ कल्याण्यां मतौ [ऋजूयताम्] ऋजुगामिनाम् ऋतुगामिनामिति वा। देवानां [रातिः] दानम् अभि नः निवर्तताम्। देवानां सख्यम् [उपसेदिम] उपसीदेम वयम् देवा नः आयुः [प्रतिरन्तु] प्रवर्धयन्तु [जीवसे] चिरञ्जीवनाय ॥ २ ॥

दुर्गाचार्यभाष्यम्।...य एते देवाः रश्मयः नित्यम् ऋज्वेव मण्डलादनावरणत्वादन्तरिक्षस्य सर्वतो यन्ति। अथवा, ऋजूयताम् ऋतुगामिनाम् ऋतावृतौ यथाकालमस्मान्मण्डलाद् गच्छताम् सुमतिः शोभना मतिः प्रसादाभिमुखी मतिः। सा नः अस्मान् प्रति निवर्तताम् नियमेन वर्तताम्, तत्पूर्विका च रातिः धनलाभोऽस्मान् प्रति नियमेन वर्तताम्। ततश्च तेन धनलाभेन उपजनितसामर्थ्याः सन्तः वयम् तेषामेव देवानां सख्यम् समानख्यानं याज्ञे कर्मणि समानमङ्गभावम् उपसेदिम उपसीदेम उपगच्छेम वयम्[1]। ततश्च तथाभूतानामस्माकम् आयुः ते देवा प्रतिरन्तु प्रवर्धयन्तु जीवसे चिरं जीवनाय—इत्येतदाशास्महे ॥ २ ॥

[1] This **वयम्** is superfluous and ought to be dropped.

महेश्वरव्याख्यानम्। देवानां भद्रा कल्याणी सुमतिः शोभनानुग्राहिका बुद्धिः। कीदृशानां देवानाम्? ऋजूयताम् ऋजुगामिनां...वा। अभि नः अस्मान् प्रति निवर्ततामिति सम्बन्धः। देवानां रातिः देवानामेव च दानम् अभि नः अस्मान् प्रति निवर्तताम्। देवानामेव च सख्यं स्तुत्यस्तोतृत्वलक्षणं यष्टृयष्टव्यत्वलक्षणं च। उपसेदिम उपसीदेम उपगच्छेम वयमित्याशास्महे। देवा नः अस्माकमायुः प्रतिरन्तु जीवसे। तिरतिर्वृद्ध्यर्थः। प्रवर्धयन्तु चिरं जीवनाय। भाष्ये [निरुक्ते] तु "देवानां वयं ... कल्याण्यां मतौ" इति विभक्तिव्यत्ययः, स्यामेति चाध्याहारः॥ १२।३९

स्कन्दस्वामिभाष्यम्। देवानां भद्रा कल्याणी सुमतिः शोभना परानुग्रहात्मिका बुद्धिः। ऋजूयताम् ऋजवः सदाचारा मनुष्याः। तत्कामिनाम्। किंच देवानां रातिः दानम् अभि नः निवर्तताम् अस्मान् प्रति निवर्तताम्। देवा अस्मभ्यं ददत्वित्यर्थः। किं च देवानां सख्यम् उपसेदिम उपगच्छेम वयमित्याशास्महे। किं च देवा नः आयुः प्रतिरन्तु वर्धयन्तु जीवसे चिरं जीवनाय॥ २॥

महीधरभाष्यम्। भद्रा कल्याणकारिणी देवानां सुमतिः शोभना बुद्धिः नः अस्मान् प्रति अभिनिवर्तताम् अस्मदभिमुखीभवतु। कीदृशानां देवानाम्? ऋजूयताम् ऋजु अवक्रं यन्ति गच्छन्ति ऋजुयन्तस्तेषाम्। इणः शतृप्रत्ययः[1]। अवक्रगामिनाम्। यद्वा ऋजुम् अवक्रं साधुं यजमानं कामयन्ते ते ऋजूयन्ति। सुप आत्मनः क्यच्। ऋजूयन्ति ते[2] ऋजूयन्तः,

[1] The implication is that it is a *sahasupā* compound and that the lengthening is by the rule **अन्येषामपि दृश्यते**.

[2] **ऋजूयन्ति** has been repeated to show its connexion with **ते**. Should we read **ऋजूयन्तीति**?

तेषाम्। क्यजन्ताच्छतृ। साधुं यजमानं कामयमानानामित्यर्थः। किञ्च देवानां रातिः दानं नः अस्मान् अभिनिवर्तताम्। देवा अस्मभ्यं ददत्वित्यर्थः। देवेभ्यो लब्धदाना वयं देवानां सख्यं मैत्रीम् उपसेदिम प्राप्नुयाम। सदेर्लिट्युत्तमबहुत्वे रूपम्। संहितायां दीर्घः। देवाः नः अस्माकं सखीनाम्[1] आयुः जीवसे जीवितुं प्रतिरन्तु प्रवर्धयन्तु ॥२॥

उवटभाष्यम्।··· ऋजूयताम् ऋजुगामिनां यद्वा ऋजुकामिनाम्। ऋजुं प्रगुणं यजमानं कर्तुं ये कामयन्ते ते तथोक्ताः। ···

सायणभाष्यम्। भद्रा सुखयित्री भजनीया वा देवानां सुमतिः शोभना मतिरनुग्रहात्मिका बुद्धिरस्माकमस्त्विति शेषः। कीदृशानाम्? ऋजूयताम् ऋजुमार्जवयुक्तं सम्यगनुष्ठातारं यजमानमात्मन इच्छताम्। तथा देवानां रातिर्दानं नोऽस्मानाभिमुख्येन नितरां वर्तताम्। तदभिमतफलप्रदानमप्यस्माकं भवत्वित्यर्थः। वयं च तेषां देवानां सख्यं सखित्वं सख्युः कर्म वोपसेदिम। प्राप्नवाम[2]। तादृशा देवा नोऽस्माकमायुर्जीवसे जीवितुं प्रतिरन्तु[3]। वर्धयन्तु। भद्राः। भदि कल्याणे सुखे च।

[1] भक्तानाम्। उवटः।

[2] The printed editions have **प्राप्नुवाम**. This is an interesting instance of contamination, being a blend of **प्राप्नुयाम** and **प्राप्नवाम**. In view of the fact that in the previous and subsequent clauses we have the Imperative, I am inclined to think that **प्राप्नवाम** is the correct reading here. It is a thousand pities that later editors have often blindly followed Max Müller instead of exercising their own judgment.

[3] **तॄ** to cross is both **भ्वादि** and **तुदादि** in the Vedas, and so we can easily have **तिरति** like **किरति**. **प्र-तिरति** means to increase, to prolong. **सावर्णेर्देवाः प्र तिरन्त्वायुः** RV. x. 62. 11, **आप ओषधीः प्र तिरन्तु नो गिरः** RV. x. 66. 10.

"ऋज्रेन्द्राग्र०" [उ० २।३१] इत्यादौ रक्प्रत्ययान्तो निपातितः। ऋजूयताम्। ऋजुमात्मन इच्छति ऋजूयति[1]। "सुप आत्मनः क्यच्" [३।१।८]। तदन्ताल्लटः शतृ[2]। "शतुरनुमः०" [६।१।१७३] इत्यजादिविभक्तेरुदात्तत्वम्। रातिः। रा दाने। "मन्त्रे वृष०" [३।३।९६] इति क्तिन उदात्तत्वम्। सख्यम्। "सख्युर्यः" [५।१।१२६] इति भावे कर्मणि वा यप्रत्ययः[3]। सेदिमा। षद्लृ विशरणगत्यवसादनेषु। "छन्दसि लुङ्लङ्लिट्ः" [३।४।६] इति वर्तमाने प्रार्थनायां लिट्। सत्वस्या-[4]नैमित्तिकत्वेन लिटि परत आदेशादित्वाभावाद् "अत एकहल्मध्ये०" [६।४।१२०] इत्येत्वाभ्यासलोपौ। "अन्येषामपि दृश्यते" [६।३।१३७] इति संहितायां दीर्घत्वम्। प्रतिरन्तु। प्रपूर्वस्तिरतिर्वर्धनार्थः। तथा च यास्को व्याचख्यौ। "देवानां सख्यमुपसीदेम वयं देवा न आयुः प्रवर्धयन्तु चिरं जीवनाय" [नि० १२।३९] इति ॥ २ ॥

[1] In such cases it is usual to use the number of the word to be explained. See Mahīdhara-bhāṣya. Should we read ऋजुमात्मन इच्छन्ति ऋजूयन्ति ?

[2] शतृ is neut. here. Bengali writers generally use शता. It is usual to write शतृप्रत्ययः in such cases.

[3] Hence S. has said above सखित्वं सख्युः कर्म वा.

[4] This is based on the Kāśikā: अनैमित्तिके नत्वसत्वे, तदादिलिट्यादेशादिर्न भवति।

तान्पूर्वया निविदा हूमहे वयं

भगं मित्रमदितिं दक्षमस्रिधम्।

अर्यमणं वरुणं सोममश्विना
सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥

तान् । पूर्वया । निऽविदा । हूमहे । वयम् ।
भगम् । मित्रम् । अदितिम् । दक्षम् । अस्रिधम् ।
अर्यमणम् । वरुणम् । सोमम् । अश्विना ।
सरस्वती । नः । सुऽभगा । मयः । करत् ॥ ३ ॥

वेङ्कटमाधवव्याख्यानम् । तान् पूर्वया [निविदा] वाचा [हूमहे] ह्वयामः वयम् भगादीन् दक्षं च [अस्रिधम्] अक्षयम् । सरस्वती च [नः] अस्माकं सुभगा [मयः] सुखम् [करत्] करोतु ॥३॥

काश्यपक्षितीशचन्द्रभाष्यम् । तानिति । **वयं तान् पूर्वया** प्राचीनेन **निविदा** स्तोत्रविशेषेण **हूमहे** आह्वयामः । यैः किल स्तोत्ररत्नैः प्राचीनतमा ऋषयो देवानाहूय तेषां प्रसादभाजनताम् अवाप्तवन्तस्तैरेव स्वतः समयतश्च पूततमैर्वाग्विस्तरैर्वयमपि देवानाहूय तेषामनुग्रहपात्रतामासादयेमेति हृदयम् । कानित्यपेक्षायामाह—**भगं** सौभाग्यदेवताम्, **मित्रं** सर्वजगन्मित्रभूतमहरभिमानिनं "यातयज्जनम्" देवम्, **अदितिम्** देवमातरं सर्वेभ्यो बन्धनेभ्यो विमोचिकां विपद्भ्यश्च प्रमोचिकां देवीम् **अस्रिधम्** अप्रमाद्यन्तं सदैव कल्याणकरं **दक्षम्** देवानां पितरम्

बलाधिष्ठातारं देवम्, **अर्यमणम्** गोधूलिकालस्याधिष्ठातारं देवम्, **वरुणम्** पापानां शासितारं **सोमं** यज्ञस्य सर्वस्वभूतमोषधिपतिम् **अश्विना** अश्विनौ विपद्भ्य उत्तारकौ देवभिषजौ। एतान् देवान् श्रद्धाभक्तिपरिपूतचेतसो वयमाह्वयामः, ते नः पापेभ्यः प्रमोचयन्तु, सर्वाण्यागांसि कृतानि वा कारितानि वा सङ्कल्पितानि वा क्षाम्यन्तु, अस्माकं सुखं सौभाग्यं चानुदिनमहर्निशमभिवर्धयन्तु। **सुभगा** सौभाग्योपेता **सरस्वती नः** अस्माकं **मयः** सुखम्। "यद्वै शिवं तन्मयः" इति श्रुतेः। **करत्** करोतु विदधातु। लेट्प्रडागमः। या खलु "वाजेभिर्वाजिनीवती" सर्वासां प्रज्ञानां च ईशाना तस्याः प्रसादेनास्माकं वाक् च प्रज्ञा च सहस्रधारं सत्पथनैव प्रवर्तेताम्, सम्पदां च प्रभवौ भवताम् ॥ ३ ॥

स्कन्दस्वामिभाष्यम्। तान् पूर्वसङ्कल्पितया पूर्वप्रयुक्तया वा निविदा। निविदिति वाङ्नाम। वाचा स्तुतिलक्षणया हूमहे आह्वयामः। कतमांस्तान्? भगं मित्रम् अदितिं दक्षं च। कीदृशम्? अस्रिधम्। "न स्रेधति न व्यथते"[1] [ऋ० सं० ५।५४।७] इति प्रयोगदर्शनात् स्रिधिः क्षयार्थः शोषणार्थो वा। अक्षयमशोषयितारं वा। न च भगादीनेव केवलान्। किं तर्हि? अर्यमणं वरुणं सोमम् अश्विना अश्विनौ च। किं च सरस्वती नः अस्माकं सुभगा सुधना मयः करत् सुखं करोतु ॥३॥

महीधरभाष्यम्। पूर्वया प्राचीनया अकृत्रिमया स्वयम्भुवा निविदा वाचा वेदरूपया वयं तान् प्रसिद्धान् देवान् हूमहे आह्वयामः।

[1] The full stanza runs thus :

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति ।

नास्य राय उपदस्यन्ति नोतय ऋषिं वा यं राजानं वा सुषूदथ ॥

The root *sridh* is not read in the Dhātupāṭha. It is cognate with English *slide* and means 'to fail, to err, to blunder'. In Gk. *olisthano:* means 'I glide'.

निविच्छब्दो वाग्वाचकः । तान् कान् ? तत्राह—भगं मित्रम् अदितिं देवमातरम् दक्षं प्रजापतिम् अर्यमणं वरुणं सोमम् अश्विना अश्विनौ । अस्रिधमिति भगादीनां विशेषणम्[1] । न स्रेधते च्योतते सोऽस्रित् तम्, अच्युतसद्भावम् । किं च शोभन भगं भाग्यं यस्याः सा सुभगा भजनीया सरस्वती भगादिसहिता नः अस्माकं मयः करत् सुखं करोतु ॥३॥

सायणभाष्यम् । तान्विश्वान्देवान्पूर्वया पूर्वकालीनया[2] नित्यया निविदा वेदात्मिकया वाचा । निविदिति वाङ्नाम । यद्वा निविदा "विश्वे देवाः सोमस्य मत्सन्" [शा० श्रौ० सू० ८।२१।१] इत्यादिकया वैश्वदेव्या निविदा वयं हूमहे । आह्वयामः । देवानिति यत्सामान्येनोक्तं तदेव विव्रियते । भगं भजनीयं द्वादशानामादित्यानामन्यतमम् । मित्रं प्रमीतेस्त्रायकम् अहरभिमानिनं देवम् । "मैत्रं वा अहः" [तै० ब्रा० १।७।१०।१] इति श्रुतेः । अदितिमखण्डनीयामदीनां वा देवमातरम् । दक्षं सर्वस्य जगतो निर्माणे समर्थं प्रजापतिम् । यद्वा प्राणरूपेण सर्वेषु प्राणिषु व्याप्य वर्तमानं हिरण्यगर्भम् । "प्राणो वै दक्षः" [तै० सं० २।५।२।४] इति श्रुतेः । अस्रिधं शोषणरहितम् । सर्वदैकरूपेण वर्तमानं मरुद्गणम् । अर्यमणम् । अरीन् मन्देहादीनसुरान्यच्छति नियच्छतीत्यर्यमा सूर्यः । "असौ वा आदित्योऽर्यमा" [तै० सं० २।३।४।१] इति श्रुतेः । तम् । वरुणम् । वृणोति पापकृतः स्वकीयैः पाशैरावृणोतीति रात्र्यभिमानी देवो वरुणः । श्रूयते च । "वारुणी रात्रिः" [तै० ब्रा० १।७।१०।१] इति । सोमम् । द्वेधात्मानं विभज्य पृथिव्यां लतारूपेण दिवि च चन्द्रात्मना देवतारूपेण वर्तमानम् । अश्विना । अश्ववन्तौ । यद्वा सर्वं व्याप्नुवन्तौ । तथा

1 दक्षस्यैतत् शेषणम् । उवटः ।

2 This is grammatically indefensible but sanctioned by usage.

च यास्कः। "अश्विनौ यद्व्याश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः। अश्वैरश्विनावित्यौर्णवाभः। तत्कावश्विनौ ? द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः" [नि० १२।१] इति। एवम्भूतान् सर्वान्देवानस्मद्रक्षणार्थमाह्वयाम इति पूर्वत्र सम्बन्धः। अस्माभिराहूता सुभगा शोभनधनोपेता सरस्वती नोऽस्मभ्यं मयः सुखं करत् करोतु। हूमहे। ह्वेञ्ो लटि "ह्वः" इत्यनुवृत्तौ "बहुलं छन्दसि" [६।१।३४] इति संप्रसारणम्। परपूर्वत्वे "हलः" [६।४।२] इति दीर्घत्वम्। "बहुलं छन्दसि" [२।४।७३] इति शपो लुक्। अस्रिधम्। स्रिधु शोषणे। सम्पदादिलक्षणो भावे क्विप्। बहुव्रीहौ "नञ्सुभ्याम्" [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। मयस्करत्। करोतेर्लेट्यडागमः। "बहुलं छन्दसि" [२।४।७३] इति विकरणस्य लुक्। "अतः कृकमि०" [८।३।४६] इति विसर्जनीयस्य सत्वम् ॥ ३ ॥

तन्नो वातो मयोभु वातु भेषजं

तन्माता पृथिवी तत्पिता द्यौः।

तद्ग्रावाणः सोमसुतो मयोभुव-

स्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ४ ॥

तत्। नः। वातः। मयःऽभु। वातु। भेषजम्।

तत् । माता । पृथिवी । तत् । पिता । द्यौः ।

तत् । ग्रावाणः । सोमऽसुतः । मयःऽभुवः ।

तत । अश्विना । शृणुतं । धिष्ण्या । युवम् ॥ ४ ॥

वेङ्कटमाधवव्याख्यानम् । तत् नः वातः [मयोभु] सुखस्य भावयितृ आत्मीयं भेषजम् वातु । तत् माता पृथिवी तत् पिता द्यौः । तत् ग्रावाणः [सोमसुतः] सोमस्य सोतारः [मयोभुवः] सुखस्य भावयितारः । तत् [अश्विना] अश्विनौ [युवम्] युवामपि [धिष्ण्या] धिषणार्हौ स्तुत्यर्हौ शृणुतम् ॥४॥

काश्यपक्षितीशचन्द्रभाष्यम् । तदिति । **वातः** सर्वत्र निराबाधं प्रवहन् पवनः **तत्** प्रसिद्धं मयोभु सुखकरं **भेषजम्** औषधं **नः वातु** अस्माकं कृत आनयतु । शिम्बातेत्यादिषु विंशतिसंख्याकेषु सुखनामसु मयःशब्दः पठितः । तस्य भावयितृ मयोभु । तथाच मन्त्रवर्णाः—

वात आ वातु भेषजं शम्भु मयोभु नो हृदे ।
प्र ण आयूंषि तारिषत् ॥ [ऋ० स० १०।१८६।१]
आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥ [ऋ० स० १०।१३७।३]
यददो वात ते गृहे अमृतस्य निधिर्हितः ।
ततो नो देहि जीवसे ॥ [ऋ० स० १०।१८६।३]

इति । वायुमन्तरेण केनापि प्राणितुं न शक्यते, अत एव वायोर्गृहेऽमृतस्य निधिर्हितः, अत एव वायुरस्मभ्यं शिवङ्करं भेषजं प्रयच्छतु । **माता पृथिवी** सकलजगतः प्रसूतिः पोषयित्री च भूतधात्री धरणिरपि मयोभु

भेषजं नः प्रापयतु। पृथिव्यां प्ररूढा ओषधयः सुलभाः सत्यः सर्वान्नो व्याधीन् विनाशयन्तु। **पिता द्यौः** अपि तत् मयोभु भेषजम् वातु। अस्माकं पालयिता पितापि सुखकरं सूर्यरश्म्यादिकं सर्वरोगविद्रावकं नः प्रेरयतु। **सोमसुतः** सोमाभिषवसम्पादका **मयोभुवः** सुखस्य निवर्तकाः **ग्रावाणः** अपि तत् भेषजं नः वातु। सोमरसस्य पानेन सर्वथा निरामयाश्च सुखभाजश्च वयं भवेम। हे **धिष्ण्या अश्विना** धीमन्तावश्विनौ **युवं** युवां **तत् शृणुतम्** अस्माकमेतत् प्रार्थनमाकर्णयतं चानुमन्येथां च। भवन्तौ खलु देवभिषजौ, अतः सर्वं भेषजं भवदायत्तमेव, भवतोरनुमतिमन्तरेण न हि तत् लब्धुं शक्यम् इति।

ऋग्वेदे द्यौः प्राणिजातस्य पितृत्वेन पृथिवी च मातृत्वेन श्रूयते। तथाच मन्त्रवर्णाः—"द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम्" [ऋ० स० १।१६४।३३], [हे सर्पाः] "द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा" [ऋ० स० १।१९१।६] इत्यादयः।

तैत्तिरीयब्राह्मणेऽयं मन्त्रः परिवर्त्तिताकार उपलभ्यते—

तन्मेऽनुमतिरनुमन्यतां तन्माता पृथिवी तत् पिता द्यौः।

तद् ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं सौभगा युवम्॥ [तै० ब्रा० २।७।१६।३-४] इति॥ ४॥

स्कन्दस्वामिभाष्यम्। तच्छब्दश्रुतेर्योग्यार्थसम्बन्धो यच्छब्दोऽध्याहार्यः। यद् वयमिच्छामः तत् नः अस्मान् प्रति वातः मयोभु[1] वातु भेषजम् औषधम् वातु गमयतु। ददात्वित्यर्थः। तदेव माता पृथिवी। तदेव पिता द्यौः। विवाहकाले "द्यौरहं पृथिवी त्वम्"[2] [अथर्वसंहिता १४।२।७१] इति वरे वध्वां च द्युत्वपृथिवीत्वा-

[1] मयोभु सुखस्य भावयितृ। आगामिन्यपि काले सुखकरमित्यर्थः। हरदत्तः।

[2] अमोऽहमस्मि सा त्वं सामाहमस्मृक् त्वं द्यौरहं पृथिवी त्वम्।
तावेह सम्भवाव प्रजामा जनयावहै॥१४।२।७१

ध्यारोपात् सर्वमनुष्याणां च वधूवरमातापितृकत्वात् तद्धर्मेण मातृत्वेन पितृत्वेन च व्यपदेशः पृथिव्या दिवश्चायं—तन्माता पृथिवी तत् पिता द्यौरिति। तदेव ग्रावाणः सोमसुतः सोमाभिषवकारिणः। मयोभुवः यागद्वारेण सुखस्य भावयितारः। तदेव हे अश्विनौ शृणुतम्। श्रवणेनात्र तत्पूर्वकं करणं लक्ष्यते—कुरुतम्। हे धिष्ण्यौ धिषणा वाक् तस्याः पुत्रौ। अथवा धीरिति प्रज्ञानाम। ष्णै वेष्टने[1]। धीर्वेष्टयित्री सर्वार्थ-ग्रहणसमर्था ययोः तौ धिष्णौ। धिष्णावेव धिष्ण्यौ। अत्यन्तप्रज्ञा-वित्यर्थः। युवं युवामपि ॥४॥

महीधरभाष्यम्। वातः पवनः नः अस्माकं भेषजम् औषधं हितं यथा तथा[2] वातु। वा गतिगन्धनयोः। लोट्। प्रवातु। अनुगृह्णात्वित्यर्थः। ददात्विति यावत्। कीदृशं हितम्? मयोभु मयः सुखं भवति यस्मात् ततं मयोभु सुखोत्पादकं हितं ददातु। माता जगन्निर्मात्री पृथिवी तत् हितं वातु। पिता पालकः द्यौः स्वर्गः तत् हितं वातु। सोमं सुन्वन्ति[3] सोमसुतः सोमाभि-षवकारिणो ग्रावाणः दृषदः तद् भेषजं वान्तु ददतु। कीदृशा ग्रावाणः? मयोभुवः मयः सुखं भावयन्ति ते मयोभुवः सुखस्य दातारः। हे अश्विना अश्विनौ। युवं युवां तत् वातादिभ्यो भेषजप्रार्थनं शृणुतम्। युवामपि हितं दत्तमित्यर्थः। कीदृशौ युवाम्? धिष्ण्या धिष्ण्यौ गृहवद्धारयितारौ[4] ॥ ४ ॥

[1] Skandasvāmin's Bhāṣya of the Madras University reads **ष्णौ वेष्टने** and Haradatta's Vyākhyā of the Trivandrum University reads **षण वेष्टनें**. Both readings are vicious.

[2] Should we omit **यथा तथा** ?

[3] Acc. to the Kāś'ikā **सोमे सुन्वः** makes provision for **क्विप्** to denote past time alone.

[4] **'धिष्ण्या धारयितारौ युवं युवामपि शृणुतम्। श्रुत्वा चानुगृह्णीतम्। उवटः।**

सायणभाष्यम्। वातो वायुस्तद्भेषजमौषधं नोऽस्मान्वातु प्रापयतु। यद्भेषजं मयोभु मयसः सुखस्य भावयितृ। माता सर्वेषां जननी पृथिवी भूमिरपि तद्भेषजमस्मान्प्रापयतु। पिता वृष्टिप्रदानेन सर्वेषां रक्षिता द्यौर्द्युलोकोऽपि तद्भेषजमस्मान्प्रापयतु। सोमसुतः सोमाभिषवं कृतवन्तो मयोभुवो मयसो यागफलभूतस्य सुखस्य भावयितारो ग्रावाणोऽभिषवसाधनाः[1] पाषाणाश्च तद्भेषजमस्मान् प्रापयन्तु। हे धिष्ण्या धिषणा बुद्धिः। तदर्हावश्विनौ युवं युवां तद्भेषजं शृणुतम्। आकर्णयतम्। यद्भेषजमस्माभिर्वाय्वादिषु[2] प्रार्थ्यते तद्भेषजं देवानां भिषजौ युवामस्माकमनुकूलं यथा भवति तथा जानीतमित्यर्थः। मयोभु। "ह्रस्वो नपुंसके प्रातिपदिकस्य" [१।२।४७] इति ह्रस्वत्वम्। वातु। वा गतिगन्धनयोः। अन्तर्भावितण्यर्थात्प्रार्थनायां लोट्। सोमसुतः। "सोमे सुञः" [३।२।९०] इति भूते क्विप्। धिष्ण्या। धिषणाशब्दादर्हार्थे "छन्दसि च" [५।१।६७] इति यः। वर्णलोपश्छान्दसः। "सुपां सुलुक्०" [७।१।३९] इत्याकारः॥ ४॥

[1] In classical Sanskrit we generally find **साधनम्** formed with **ल्युट्** acc. to **कृत्यल्युटो बहुलम्** iii. 3. 113 and used exclusively in the neut. Thus Kālidāsa says :

इतिवादिन एवास्य होतुराहुतिसाधनम्।
अनिन्द्या नन्दिनी नाम धेनुरावर्तते वनात्॥ रघु० १।८२.

Sometimes the form **साधनी** is met with, as in **या लोकद्वयसाधनी तनुभृतां सा चातुरी चातुरी, क्षणसम्पदियं सुदुर्लभा प्रतिलब्धा पुरुषार्थसाधनी** etc. In the Vedas, however, **साधन** occurs in the masc. and naturally S. derives it with **ल्यु** (**साध संसिद्धौ। नन्द्यादित्वात् कर्तरि ल्युः** under RV. iii. 27.8). Similarly in the S'aṅkara-bhāṣya on *Chāndogyopaniṣad* v.3.3 we find **आहुतिसाधनाश्चापः**.

[2] **आधारविवक्षायां सप्तमी।**

तमीशानं जगतस्तस्थुषस्पतिं
धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे
रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥

तम् । ईशानम् । जगतः । तस्थुषः । पतिम् ।
धियम्ऽजिन्वम् । अवसे । हूमहे । वयम् ।
पूषा । नः । यथा । वेदसाम् । असत् । वृधे ।
रक्षिता । पायुः । अदब्धः । स्वस्तये ॥ ५ ॥

बेङ्कटमाधवव्याख्यानम् । तम् [ईशानम्] ईश्वरम् [जगतः] जङ्गमस्य [तस्थुषः] स्थावरस्य च [पतिम्] पालयितारम् [धियं-जिन्वम्] कर्मणः प्रीणयितारम् [अवसे] रक्षणाय [हूमहे] ह्वयामः वयम् । पूषा [नः] अस्माकम् [वेदसाम्] धनानाम् [असत्] भवति[1] यथा [वृधे] वर्धनाय । रक्षोभ्यो रक्षिता [पायुः] पालकः [अदब्धः] अहिंसितः [स्वस्तये] अविनाशाय ॥५॥

[1] Should we read भवेत् ?

काश्यपक्षितीशचन्द्रभाष्यम्। इदानीं निखिलजगत्परिपोषकः पूषा स्तूयते—तमिति। **जगतः** जङ्गमस्य आमनुष्य-कीटपिपीलक-पर्यन्तस्य **ईशानम्** राजन्तम्, **तस्थुषः** स्थावरस्य आपर्वतपादप-मृत्कणपर्यन्तस्य **पतिम्** प्रभुं कर्तुमकर्तुमन्यथा कर्तुं च समर्थम्। तथाच मन्त्रवर्णः—"सूर्य आत्मा जगतस्तस्थुषश्च" [ऋ० स० १।११५।१] इति, "इन्द्रो यातोऽवसितस्य राजा" [ऋ० स० १।३२।१५] इति च। **धियंजिन्वम्** धियं ध्यानं जिन्वति प्रेरयति समुत्तजयतीति धियंजिन्वम्। ध्यानस्य समुत्तेजकं स्तोत्राणां समुत्सारकमिति यावत्। पूषा खलु नैशस्य तमसो निवारणेन बुद्धि-प्रसादं संजनय्य रश्मिनिवहैरखिलं जगदुद्भासयन्, जनानां वदनार-विन्दात् स्तोत्ररेणून् समुत्सारयति। तम् पूषणं **वयम् अवसे** रक्षणाय **हूमहे** आह्वयामः। उत्तरार्धेन रक्षणप्रकारं प्रपञ्चयति—पूषेति। **यथा** येनाह्वानेन **पूषा** पोषणाभिमानी देवः। "पुष्यन् क्षितिं पोषयति प्रणुदन् रश्मिभिस्तमः। तेनैनमस्तौत् पूषेति" इति बृहद्देवतायाम् [२।६३]; "अथ यद्रश्मिपोषं पुष्यति तत् पूषा भवति" इति निरुक्तम् [१२।१७]। अथ यत् यदा रश्मिपोषम् आपूर्णस्तेजसा रश्मीन् सूर्यः पुष्यति बिभर्ति तत् तदैव पूषा भवतीति तद्व्याख्यानम्। **नः** अस्माकं **वेदसाम्** धनानां **वृधे** वर्धनाय **असत्** भवतु। पूष्णः प्रसादेनानुदिनमस्माकं सम्पदः समेधन्ताम्। स च पूषा **रक्षिता** दैवीभ्यो मानुषीभ्यश्च विपद्भ्योऽस्माकं त्राता **अदब्धः** अहिंसितः **पायुः** पशुपुत्रादीनां पालकः **स्वस्तये** शोभनावस्थानाय भवतु। तस्य च सान्द्रयानुकम्पया सदैवास्माकं पशुपुत्रादीनाञ्च रक्षणं भवतु, अस्माकं च सर्वाङ्गीणं कुशलं भवतु।

(ईशानं) जगतः। गतिकर्मणो जौहोत्यादिकगाधातोः शतरि ङीपि रूपम्। "अधीगर्थदयेशां कर्मणि" [२।३।५२] इति कर्मणि

षष्ठी। तथाच मन्त्रान्तरम्—(पूषणम्) "ईशानं राय ईमहे" [ऋ० सं० ६।५४।८] इति। धियंजिन्वम्। जिविः प्रेरणार्थः। तस्मात् खच्। विश्वमिन्वादयोऽप्येवम् ॥ ५ ॥

स्कन्दस्वामिभाष्यम्। तच्छब्दश्रुतेर्योग्यार्थसम्बन्धो यच्छब्दोऽध्याहार्यः। यमन्येऽपि सर्वं आह्वयन्ति तं पूषणम् ईशानं जगत ईश्वरं जङ्गमस्य,तस्थुषः पतिं स्थावरस्य च स्वामिनम्। धियंजिन्वम्। जिन्वतिः प्रीतिकर्मा। सर्वप्रज्ञानां प्रीणयितारम्। अवसे पालनायात्मनः हूमहे आह्वयामः वयम्। कथं च पुनराह्वयामः? उच्यते। आहूतः पूषा नः अस्माकं यथा वेदसां धनानां ज्ञानानां वा असत् भवेत्। वृधे वर्धनाय। यथा नो धनवृद्धिकरो ज्ञानवृद्धिकरो वा स्यादित्यथः। रक्षिता पायुः पाता च सोमानाम्। अदब्धः अहिंसितः केनचित्। स्वस्तये। स्वस्तीत्यविनाशनाम। अविनाशकरश्च स्यादित्यर्थः ॥५॥

महीधरभाष्यम्। वयं तं प्रसिद्धम् ईशानं रुद्रं हूमहे आह्वयामः। कीदृशं तम्? जगतः जङ्गमस्य तस्थुषः स्थावरस्य च भूतजातस्य पतिम् पालकम्। धियंजिन्वं धियं बुद्धिं जिन्वति प्रीणातीति धियंजिन्वः तम्। अलुक्। बद्धिसन्तोषकारकम्। जिन्वतिः प्रीणनार्थः। किमर्थं हूमहे? अवसे अवितुं तर्पयितुम्। तुमर्थे असेप्रत्ययः। यथा यन प्रकारेण पूषा नः अस्माकं वृधे वृद्धैश्च स्वस्तये कल्याणाय च असत् भवतु तथा हूमहे इत्यर्थः। कीदृशः पूषा? वेदसां धनानां ज्ञानानां वा रक्षिता रक्षकः। पायुः पालकः पुत्रादीनाम्। अदब्धः अनुपहिंसितः ॥ ५ ॥

सायणभाष्यम्। पूर्वार्धेनेन्द्रः स्तूयते, अपरार्धेन पूषा। ईशानमैश्वर्यवन्तम्। अत एव जगतो जङ्गमस्य प्राणिजातस्य तस्थुषः स्थावरस्य च पतिं स्वामिनं धियंजिन्वं धीभिः कर्मभिः प्रीणयितव्यम्। एवंभूत तमिन्द्रमवसे रक्षणाय वयं हूमहे। आह्वयामः। पूषा नोऽस्माकं

वेदसां धनानां वृधे वर्धनाय रक्षिता यथासत्। येन प्रकारेण भवति। तेनैव प्रकारेणादब्धः केनाप्यहिंसितः पूषा स्वस्तयेऽस्माकमविनाशाय पायुः रक्षिता भवतु। तस्थुषः। तिष्ठतेर्लिटः क्वसुः। षष्ठ्येकवचने "वसोः संप्रसारणम्" [६।४।१३१] इति संप्रसारणम्। "शासिवसिघसीनां च"[1] [८।३।६०] इति षत्वम्। "षष्ठ्याः पतिपुत्र०" [८।३।५३] इति विसर्जनीयस्य सत्वम्। धियंजिन्वम्। जिविः प्रीणनार्थः। "कृत्यल्युटो बहुलम्" [३।३।११३] इति बहुलवचनात्खच्। "इच एकाचोऽम् प्रत्ययवच्च" [६।३।६८] इत्यमागमः। असत्। अस भुवि। लेट्यडागमः। "बहुलं छन्दसि" [२।४।७३] इति शपो लुगभावः। पायुः। पा रक्षणे "कृवापाजि०" [उ० १।१] इत्युण्। स्वस्तये। सुपूर्वादस्तेर्भावे क्तिन्। "छन्दस्युभयथा" [३।४।११७] इति तस्य सार्वधातुकत्वाद् "अस्तेर्भूः" [२।४।५२] इति भूभावाभाव इति वृत्तावुक्तम्[2] ॥ ५ ॥

[1] The rule for the mutation of the dental sibilant into the cerebral is **आदेशप्रत्यययोः** viii. 3. 51. Sāyaṇa, however, often quotes **शासिवसिघसीनां च** in this connexion. The preceding **शासि** and the following **घसि** are enough to show that **वसि** here does not refer to the suffix *kvasu* but to the root *vas*. Further the suffix is always referred to as *vasu* and not *vasi*. But the most important point in this connexion is that in the case of *kvasu* which is a pratyaya the **षत्व** is already provided for by the rule **आदेशप्रत्यययोः**, and so no useful purpose would be served by the inclusion of **वसि** in **शासिवसिघसीनां च**.

There appears to be some misconception regarding the meaning of the Vārttika **इक्ष्टिपौ धातुनिर्देशे**. Here **इक्** is evidently the pratyāhāra denoting i, u, ṛ, ḷ—short or long.

[2] The reference is to Kāśikā iii. 4. 117 where we find: **स्वस्तये नावमिवारुहेम। क्तिनः [क्तिचः ?] सार्वधातुकत्वादस्ते र्भूभावो न भवति।** Cf. Nir. iii.21: **अस्तिरभिपूजितः। सु अस्तीति।**

परिष्कारः। पूर्वार्धनेन्द्रः स्तूयतेऽपरार्धेन पूषेति। "इन्द्रो यातोऽवसितस्य राजा" इत्यादिश्रुतेः पूर्वार्धस्येन्द्रदेवताकत्वं भाष्यकारस्याभिमतम्। परं पूष्णोऽपीशानत्वश्रवणात्,

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत् सञ्चक्षाणो भुवना देव ईयते॥

[ऋ० सं० ६।५८।२] इति पूषदेवताकेऽपि मन्त्रे धियंजिन्वविशेषणसन्दर्शनाच्चास्यापि पूषदेवताकत्वमवसीयते॥ "कृत्यल्युटो बहुलम्" इति सूत्रतः बहुलमिति पदमुत्तरसूत्रेष्वनुवर्तते। तेन सर्वेऽपि कृत्प्रत्यया बाहुल्येन भवन्ति, येषु धातुषु विहितास्ततोऽन्यत्रापि भवन्ति। "नासिकास्तनयोर्धमधेटोः" [३।२।२९] इति वर्तते। धीविश्वयोर्जिन्वेन्बोरपि भवति॥ ५॥

स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः
स्वस्ति नो बृहस्पतिर्दधातु॥ ६॥

स्वस्ति। नः। इन्द्रः। वृद्धऽश्रवाः।

स्वस्ति । नः । पूषा । विश्ववेदाः ।
— — — —

स्वस्ति । नः । तार्क्ष्यः । अरिष्टनेमिः ।
— —

स्वस्ति । नः । बृहस्पतिः । दधातु ॥ ६ ॥
— — — — —

वेङ्कटमाधवव्याख्यानम् । स्वस्ति [नः] अस्माकम् इन्द्रः [वृद्धश्रवाः] वृद्धान्नः । स्वस्ति नः पूषा [विश्ववेदाः] विश्वधनः । स्वस्ति नः तार्क्ष्यः च [अरिष्टनेमिः] अहिंसितायुधः । स्वस्ति [नः] अस्माकं बृहस्पतिः च दधातु ॥६॥

काश्यपक्षितीशचन्द्रभाष्यम् । स्वस्ति न इति । **वृद्धश्रवाः** विपुलयशाः **इन्द्रः** बलाभिमानी देवः **नः स्वस्ति** कल्याणं **दधातु** प्रसादीकरोतु । पुष्कलकीर्त्तेरिन्द्रस्य प्रसादेन वयं यशस्विनः परैरनभिभवनीयाश्च भवेमेति हृदयम् । तथाच मन्त्रान्तरम् [ऋ० सं० ६।४७।११]—

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं देवमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥

इति । **विश्ववेदाः** सर्वधनः **पूषा** पोषको देवः नः स्वस्ति दधातु । पूष्णः प्रसादेन वयं पशुपुत्रभूमिहिरण्यरूपां सम्पदमधिगच्छेमेति भावः । **अरिष्टनेमिः** अरिष्टा अहिंसिता नेमिः चक्रधारा यस्य तादृशः **तार्क्ष्यः** दिव्यः अश्वः नः स्वस्ति दधातु । तार्क्ष्यस्य प्रसादेन गमनागमनकाले यानवाहनादीनां विपत्तिर्मा भूदित्यर्थः । तथाच मन्त्रवर्णः [ऋ० १०।१७८।१]-

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥

इति । **बृहस्पतिः** वागधिष्ठात्री देवता नः स्वस्ति दधातु । बृहस्पतेः प्रसादेन वयं वैदुष्यं लभमहि, आर्त्विजीनाश्च स्यामेति भावः । वेदेषु स्वस्तिशब्दः स्त्रियां नपुंसके च वर्तते । अत्र नपुंसकलिङ्गस्य प्रयोगः । विशेषणानां साभिप्रायत्वात् परिकरोऽलङ्कारः । तल्लक्षणमुदाहरणञ्च कुवलयानन्दे—अलङ्कारः परिकरः साभिप्रायविशेषणे । सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥ इति । मन्त्रेऽस्मिन् विराट्स्थाना छन्दः । तल्लक्षणं च ऋक्प्रातिशाख्ये [१६।४४]—

नवको दशको वा स्यादेकोऽनेकोऽपि त्रिष्टुभः ।
एकादशाक्षरश्चापि विराट्स्थाना ह नाम सा ॥ इति ।

व्याख्यातं चोवटेन—"त्रिष्टुभः पाद एकोऽप्यनकोऽपि नवको वा दशको वा स्यात्, एकादशाक्षरश्चैकोऽप्यनेको वा स्यात्, सा विराट्स्थाना नाम वेदितव्या" इति । प्रकृते मन्त्रे प्रथमद्वितीयौ पादौ नवाक्षरौ, तृतीयो दशाक्षरश्चतुर्थः स्वस्तिगतस्य वकारस्य विश्लेषणेनैकादशाक्षर इति लक्षणसमन्वयः ।

अन्यत्रापि श्रूयते [ऋ० सं० ५।५१।११-१५]—

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः ।
स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥
स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ।
बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥
विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये ।
देवा अवन्त्यृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव ।
पुनर्ददताघ्नता जानता सं गमेमहि ॥ इति ॥ ६ ॥

स्कन्दस्वामिभाष्यम् । दधात्वित्यन्तमाख्यातपदं सर्वत्रैवानुषक्तव्यम् । स्वस्ति नः इन्द्रः दधातु विधत्ताम् । करोत्वित्यर्थः । कीदृशः ? वृद्धश्रवाः प्रवृद्धकीर्त्तिः प्रवृद्धधनः प्रवृद्धान्नो वा । स्वस्ति नः पूषा विश्ववेदाः सर्वज्ञः सर्वधनो वा । स्वस्ति नः तार्क्ष्यः अरिष्टनेमिः । नेमिरिति वज्रनाम । अहिंसितायुधः । स्वस्ति नः बृहस्पतिः दधातु ॥६॥

महीधरभाष्यम् । विराट्स्थाना । आद्यौ पादौ नववर्णौ तृतीयो दशकः, तुर्यो व्यूहेनैकादशकः । "नवको वैराजस्त्रैष्टुभश्च" [अनु० ९।५] इति वचनात् । इन्द्रः नः अस्मभ्यं स्वस्ति अविनाशं शुभं दधातु ददातु । कीदृशः ? वृद्धश्रवाः वृद्धं महत् श्रवः कीर्त्तिः यस्य सः । पूषा नः स्वस्ति ददातु । कीदृशः ? विश्ववेदाः विश्वं सर्वं वेदो धनं यस्य, विश्वं वेत्तीति वा विश्ववेदाः । तार्क्ष्यो रथो गरुड़ो वा नः स्वस्ति दधातु[1] । कीदृशः ? अरिष्टनेमिः अरिष्टा अनुपहिंसिता नेमिश्चक्रधारा पक्षो वा यस्य सः । बृहस्पतिर्देवगुरुः नः अस्मभ्यं स्वस्ति ददातु ॥ ६ ॥

उवटभाष्यम् । स्वस्ति स्वस्त्ययनम् । . . दधातु स्थापयतु । . वृद्धश्रवाः प्रभूतधनः महाशब्दो महाकीर्तिर्वा । . . अरिष्टनेमिः अनुपहिंसितासुः[2] ॥ ६ ॥

सायणभाष्यम् । वृद्धश्रवाः । वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृश इन्द्रो नोऽस्माकम् । स्वस्तीत्यविनाशनाम

[1] Should we read **ददातु** ?

[2] Should we read **अनुपहिंसितायुधः** or does Uvaṭa give merely the *tātparya* ?

[निरु० ३।२१]। स्वस्त्यविनाशं दधातु। विदधातु करोतु। विश्ववेदाः। विश्वानि वेत्तीति विश्ववेदाः[1]। यद्वा विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य। तादृशः पूषा पोषको देवो नोऽस्माकं स्वस्ति विदधातु। अरिष्टनेमिः। नेमिरित्यायुधनाम। अरिष्टोऽहिंसितो नेमिर्यस्य। यद्वा। रथचक्रस्य धारा नेमिः। यत्सम्बन्धिनो रथस्य नेमिर्न हिंस्यते सोऽरिष्टनेमिः। एवंभूतस्तार्क्ष्यः। तृक्षस्य पुत्रो गरुत्मान् नोऽस्माकं स्वस्त्यविनाशं विदधातु। तथा बृहस्पतिर्बृहतां देवानां पालयिता नोऽस्माकं स्वस्त्यविनाशं विदधातु॥

[1] The first explanation presents difficulties regarding the accent. Since the word is not a Bahuvrīhi compd., *bahuvrīhau vis'vaṃ saṃjñāyām* does not apply and the word will be paroxytone acc. to *gatikārakopapadāt kṛt* vi. 2. 139. In the words of S. there will be *kṛduttarapadaprakṛtisvaratvam*. *Vis'vavid* is an upapada compd. and is always accented on the final member acc. to this rule. Of course, *vyatyaya* is always ready to oblige us, but we should have recourse to *vyatyaya* only when there is no other course open to us. Under AV. i. 32. 4 दिवे च विश्ववेदसे पृथिव्यै चाकरं नमः the printed commentary reads : दिवे उक्तलक्षणाय द्युलोकाय विश्ववेदसे। वेद इति धननाम। विश्वस्य जगतो धनभूताय। वृष्टिप्रदानेन सर्वधनहेतुत्वाद् धनात्मकत्वम्। यद्वा वेद इति ज्ञाननाम। विश्वं विश्वविषयं ज्ञानं यस्याः सा तथोक्ता तस्यै। Here also the first explanation is to be rejected, for in that case the compound will be accented on the final syllable. Again since all the other three epithets are Bahuvrīhis, there is no reason why we should commit *prakramabhaṅga* by taking *vis'vedas* as an upapada compd. It is just possible that विश्वानि वेत्तीति विश्ववेदाः, यद्वा is an ignorant reader's note, for S. takes no note of this explanation while showing the grammatical formation of the compd.

वृद्धश्रवाः। बहुव्रीही पूर्वपदप्रकृतिस्वरत्वम्। विश्ववेदाः। विद ज्ञाने। विद्लृ लाभे। आभ्यामसुन्प्रत्ययान्तो वेदस्शब्दः। "बहुव्रीही विश्वं संज्ञायाम्" [६।२।१०६] इति पूर्वपदान्तोदात्तत्वम्। तार्क्ष्यः। तृक्षस्यापत्यम्। "गर्गादिभ्यो यञ्" [४।१।१०५]। ञित्त्वादाद्युदात्तत्वम्। अरिष्टनेमिः। न रिष्टाऽरिष्टा[1]। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अरिष्टा नेमिर्यस्य स तथोक्तः। बृहस्पतिः। "तद्बृहतोः करपत्योः०" [६।१।१५७ गणसूत्र] इति सुट्तलोपौ। "उभे वनस्पत्यादिषु०" [६।२।१४०] इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्॥ ६॥

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। वृद्धैर्महात्मभिः सदा पुराणेषु श्रूयत इति वृद्धश्रवाः। तादृश इन्द्रः नः अस्माकम् स्वस्ति दधातु अध्ययनश्रवणानुष्ठानार्थं क्षेमं सम्पादयतु। विश्वं वेत्ति जानातीति विश्ववेदाः। तादृशः पूषा अपि नः स्वस्ति दधातु। अरिष्टम्

1 In all the printed editions we find : **अरिष्टोऽहिंसितो नेमिर्यस्य। * * * न रिष्टा अरिष्टा। अरिष्टा नेमिर्यस्य सः।** Even if **नेमिः** had been both neut. and fem., this would have appeared strange, but since the word is exclusively fem. in this sense the first sentence is manifestly incorrect. The correct reading is, of course : **अरिष्टाहिंसिता नेमिर्यस्य सः**

The word **स्वस्ति** is both fem. and neut. So we have **स्वस्तये** in st. 5 and **स्वस्ति** (neut. Acc. sing.) in this st.

Yāska while explaining **अतूर्तो राजा श्रवमिच्छमानः** (RV. i.126.1) says : **प्रशंसाम् इच्छमानः। यज्ञसंयोगाद्राजा स्तुतिं लभते।** (Nir. IX. 10). Again he says : **श्रवः श्रवणीयं यशः** (Nir. XI. 10). In the Nighaṇṭu both **श्रवः** and **यशः** are given under **धननामानि**. As **श्रवः** corresponds exactly to Gk. *kle(w)os* fame, we have taken it in that sense here.

अहिंसा तस्य नेमिस्थानीयः[1] । यथा लोहमयी नेमिः काष्ठमयस्य चक्रस्य भङ्गाभावाय पालयति एवमयं तार्क्ष्यः गरुड़ोऽपि सर्पादिकृतां हिंसां निवार्य तत्पालकत्वादरिष्टनेमिः । तादृशः तार्क्ष्यः नः स्वस्ति दधात् । बृहस्पतिश्च ब्रह्मचर्यं परिपाल्य नः स्वस्ति दधातु ॥६॥

[1] The accent shows that this is a Bahuvrīhi.

पृषदश्वा मरुतः पृश्निमातरः

शुभंयावानो विदथेषु जग्मयः ।

अग्निजिह्वा मनवः सूरचक्षसो

विश्वे नो देवा अवसागमन्निह* ॥ ७ ॥

पृषत्ऽअश्वाः । मरुतः । पृश्निऽमातरः ।

---

* गमन् is the root aorist subjunctive of गम्. In the tenth maṇḍala we find—

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥

where occurs गमन्तु which is regarded as a blend of गच्छन्तु and गमन् "since the thematic aorist *agamat* is rare and dubious in the Saṃhitās".

शुभम्ऽयावानः । विदथेषु । जग्मयः ।

अग्निऽजिह्वाः । मनवः । सूरऽचक्षसः ।

विश्वे । नः । देवाः । अवसा । आ । गमन् । इह ॥ ७ ॥

वेङ्कटमाधवव्याख्यानम् । [पृषदश्वाः] पृषद्वर्णाश्वाः मरुतः [पृश्निमातरः] गोमातरः[1] [शुभंयावानः] उदकं प्रति गन्तारः [विदथेषु] यज्ञेषु [जग्मयः] गमनशीलाः [अग्निजिह्वाः] अग्न्यास्याः [मनवः] मन्तारः [सूरचक्षसः] सुवीर्यदर्शनाः विश्वे [नः] अस्मान् देवाः [अवसा] रक्षणेन सह [आगमन्] आगच्छन्तु इह ॥७॥

काश्यपक्षितीशचन्द्रभाष्यम् । यागस्थाने देवानां समागमनं प्रार्थयते—पृषदश्वा इति । पृषत्यः श्वेतबिन्दुङ्किता मृग्यः अश्वाः वाहा येषां ते **पृषदश्वाः** । यदा मरुतो वहन्ति तदा बिन्दुशो वारिपतनं सञ्जायते, अत एव "पृषत्योऽश्वास्तु मरुताम्" इत्युच्यते । पृश्निः विचित्रबिन्दुङ्किता गौः माता येषां ते पृश्निमातरः । "ऋतश्छन्दसि" [५।४।१५८] इति समासान्तप्रतिषेधः । यदान्तरिक्षं मेघनिचितं विचित्रवर्णं भवति तदैव मरुतः प्रवर्तन्ते, अत ईदृशे मेघे तेषां मातृत्वमुपचर्यते, अतस्ते गोमातर इति पृश्निमातर इति च व्यपदिश्यन्ते । **शुभंयावानः** समुज्ज्वलशोभं यथा स्यात् तथा गन्तारः, तथा च तैत्तिरीयब्राह्मणेऽश्विनावधिकृत्य श्रूयते—शुभं गमिष्ठौ सुगमेभिरश्वैः

[1] Both **गोमातरः** and **पृश्निमातरः** occur in RV. i. 85, but **गोमातरः** would be incorrect in the classical language, the correct form being **गोमातृकाः**.

[३।१२।१०] इति। **विदथेषु** यज्ञेषु **जग्मयः** गमनशीलाः। तथा, **अग्निजिह्वाः** अग्निर्जिह्वा येषां ते। देवा ह्यग्निनैव हविरादिकं लिहन्ति, अत एव अग्निस्तेषां जिह्वेत्युपचारः। **सूरचक्षसः** सूरः सूर्यः चक्षः चक्षुः येषां ते। अत एव सूर्यमुद्दिश्य श्रूयते "नमो मित्रस्य वरुणस्य चक्षसे" [ऋ० स० १०।३७।१] इति, "चक्षुर्मित्रस्य वरुणस्याग्नेः" [ऋ० स० १।११५।१] इति, "सूर्यो यथा सर्वलोकस्य चक्षुः" [कठोपनिषद् २।२।११] इति च। **मनवः** मनोः समुत्पन्नाः। आदौ मानुषाः अनन्तरं पुण्यप्रभावेण देवत्वमनुप्राप्ता ऋभुप्रभृतयः। यथा—"दिवि रुद्रासो अधि चक्रिरे सदः" [ऋ० स० १।८५।२] इत्यत्र रुद्रशब्देन रुद्रपुत्रा मरुतो लक्ष्यन्ते, यथा वा "ओजायमानं यो अहिं जघान दानुं शयानं स जनास इन्द्रः" [ऋ० स० २।१२।१०] इत्यत्र दानुशब्देन मातृवाचिना दानुतनयो वृत्रो लक्ष्यते, तथात्रापि मनुशब्देन मनुतनया लक्ष्यन्ते। एवं मरुद्भिश्च मनुजैश्चोपलक्षिता **विश्वे देवाः** सर्वे देवगणाः **नः** अस्माकम् **अवसा** रक्षणेन रक्षणसाधनायेत्यर्थः **इह** अत्र यज्ञभूमौ **आगमन्** आगच्छन्तु। अस्माभिराहूता यागभूमिमागम्यास्मान् परिरक्षन्तु। "तद्देवानामवो अद्या वृणीमहे" इत्यर्थः॥ ७॥

स्कन्दस्वामिभाष्यम्। पृषत्योऽश्वा येषां ते पृषदश्वाः। मरुतः। पृश्निमातरः। पृश्निः द्यौः। सा माता येषां ते पृश्निमातरः। शुभंयावानः। शुभमित्युदकम्। तदर्थं मेघान् प्रति गन्तारः। विदथेषु यज्ञेषु जग्मयः गमनशीलाः। न च केवला मरुतः। किं तर्हि? अग्निजिह्वाः। वक्ष्यमाणानां विश्वेषां देवानामेतद् विशेषणं न मरुताम्। कुत एतत्? "ये अग्निजिह्वा उत वा यजत्राः" [ऋ० सं० ६।५२।१३] इति प्रयोगदर्शनात्। अग्निर्जिह्वास्थानीयो येषां ते अग्निजिह्वाः। अग्नौ प्रक्षिप्तं हविर्देवा अश्नन्ति। तेनैषामग्नि-

र्जिह्वास्थानीयः। मनवः मन्तारः ज्ञातारः। सूरचक्षसः सूर्यस्येव चक्षो दर्शनं येषां ते सूरचक्षसः। एवंरूपाः विश्वे देवाः नः अवसा अस्माकं पालनेन हेतुना। वयं पालयितव्या इत्येवमर्थमित्यर्थः। आगमन् आगच्छन्तु इह यज्ञे। पृषदश्वादिगुणा मरुतः अग्निजिह्वादिगुणाश्च विश्वे देवा अस्मत्पालनार्थमिह यज्ञे आगच्छन्त्विति समस्तार्थः॥ ७॥

महीधरभाष्यम्। जगती। मरुतो देवाः अवसा अन्नेन[1] हविर्लक्षणेन हेतुना इह यज्ञ आगमन् आगच्छन्तु। कीदृशा मरुतः? पृषदश्वाः पृषतीसंज्ञा अश्वा वड़वा वाहनं येषां ते पृषदश्वाः। पुंवद्भावः। "पृषत्यो मरुताम्" इति निघण्टुवचनात् [निघ० १।१५]। यद्वा पृषन्तः शबला अश्वा येषां ते। पृश्निद्यौर्गौर्दितिर्वा माता जननी येषां ते पृश्निमातरः। शुभं कल्याणं यान्ति प्राप्नुवन्ति प्रापयन्ति वा शुभंयावानः[2]। "आतो मनिन्०" [३।२।७४] इति वनिप्प्रत्ययः। विदथेषु यज्ञगृहेषु जग्मयः गमनशीलाः। "आदृगमहन०" [३।२।१७१] इति किः। अग्निजिह्वा अग्निर्जिह्वा भोजनसाधनं येषां ते। "अग्निमुखा वै देवाः"[3] [ताण्ड्र० २५।१४।४] इति श्रुतेः। हुताद इत्यर्थः। मन्यन्ते जानन्तीति[4] मनवः सर्वज्ञाः[5]। सूरः सूर्यश्चक्षश्चक्षुर्येषां ते, सूर्यं चक्षते पश्यन्तीति[4] वा सूरचक्षसः। किञ्च न केवलं मरुतः विश्वे सर्वे देवाः च नः अस्माकं यज्ञ आगमन् आगच्छन्तु॥ ७॥

1 अवसा अन्नेन हविर्लक्षणेनाहूताः सन्तः। उवटः।

2 शुभं कर्तुं जनान् प्रति ये यान्ति। उवटः।

3 The Tāṇḍya Mahā-Brāhmaṇa reads देवताः for देवाः. The Śatapatha Brāhmaṇa has अग्निमुखा उ वै सर्वे देवाः xiii. 7.i.3.

4 The N. S. Press edition omits इति in such cases.


5 मनवश्चतुर्दश ते च अवसा गमन्निह। उवटः।

सायणभाष्यम्। पृषदश्वाः। पृषद्भिः श्वेतबिन्दुभिर्युक्ता अश्वा यषां ते तथोक्ताः। पृश्निमातरः। पृश्निर्नानावर्णा गौर्माता येषाम्। शुभंयावानः। शुभं शोभनं यान्ति गच्छन्तीति शुभंयावानः। शोभनगतय इत्यर्थः। विदथेषु यज्ञेषु जग्मयो गन्तारः। अग्निजिह्वाः। अग्नेर्जिह्वायां वर्तमानाः[1]। सर्वे हि देवा हविःस्वीकरणायाग्नेर्जिह्वायां वर्तन्ते। तात्स्थ्यात्ताच्छब्द्यं। मनवः सर्वस्य मन्तारः। सूरचक्षसः। सूर्यप्रकाश इव चक्षः प्रकाशो येषां त एवंभूता मरुतो मरुत्संज्ञका विश्वे देवा सर्वे देवा नोऽस्मानिहास्मिन् कालेऽवसा रक्षणेन सहागमन् आगच्छन्तु॥ शुभंयावानः। या प्रापणे। "आतो मनिन्०" [३।२।७४] इति वनिप्। "तत्पुरुषे कृति बहुलम्" [६।३।१४] इति बहुलवचनाद् द्वितीयाया अप्यलुक्। गमन्[1]। गमेः प्रार्थनायां लेटडागमः। "इतश्च लोपः०" [३।४।९७] इतीकारलोपः। "बहुलं छन्दसि"[२।४।७३] इति शपो लुक्॥ ७॥

[1] This forced explanation has become necessary because the word is oxytone. It is evidently a Bahuvrīhi, but Bahuvrīhis normally accent the first member. There are several courses open to us. We may include **अग्निजिह्वा** under **निरुदकादि** (VI. 2. 184) which is an **आकृतिगण** or under **त्रिचक्रादि** VI. 2. 199. I (**अन्तोदात्तप्रकरणे त्रिचक्रादीनां छन्दस्युपसंख्यानम्**). Under RV. I. 44. 14 S. says : **अग्निजिह्वाः, अग्नेर्जिह्वायामवस्थिताः हविर्भाज इत्यर्थः। तात्स्थ्यात्ताच्छब्द्यम्। यद्वा। अग्निर्जिह्वास्थानीयः येषां ते। छान्दसमन्तोदात्तत्वम्।** It is most unfortunate that **यद्वा** is not found in the printed editions, but unless we supply it the explanation will be meaningless. S. first explains **अग्निजिह्वाः** as a Tatpuruṣa and gets the meaning by **लक्षणा** with the help of the dictum **तात्स्थ्यात्ताच्छब्द्यम्**. He is evidently not satisfied with the explanation and suggests that we may regard

अग्निजिह्वाः as a Bahuvrihi compound, the accent on the last syllable being a Vedic peculiarity.

As Wackernagel points out, when *Agni*, *ghṛta* and *citra* are the first members of Bahuvrīhi compounds, the second member is accented.



वेङ्कटमाधवव्याख्यानम्। भद्रं [कर्णेभिः] कर्णैः शृणुयाम देवाः। भद्रम् एव पश्येम [अक्षभिः] अक्षिभिः [यजत्राः] यष्टव्याः। स्थिरैः अङ्गैः तुष्टुवांसः तनूभिः च युक्ताः [व्यशेम] व्यश्याम [प्राप्यास्य?] [देवहितम्] देवैर्निहितम् शत-संख्याकम् आयुः ॥ ८ ॥

काश्यपक्षितीशचन्द्रभाष्यम्। अनेन मन्त्रेण प्रार्थनासारसर्वस्वं देवेभ्यो निवदयति—भद्रमिति। हे **देवाः, कर्णेभिः** कर्णैः **भद्रं** कल्याणं वचनं **शृणुयाम** आकर्णयेम। मा खलु स्वजनविधुराणां करुणक्रन्दितेन मदमत्तानां कलहकोलाहलेन ज्ञातीनां च श्रवणदाहिना वचनजालेन दह्यमानकर्णा भूम, प्रत्युत वेदशास्त्राणां स्निग्धगम्भीर-निर्घोषेण पुत्रमित्रकलत्रादीनां प्रहर्षप्रजल्पितेन साधुजनानाममृतायमाने-नालपितेन च श्रोत्रयुगलं नः प्रसादमधिगच्छतु। तथाच तैत्तिरीय-ब्राह्मणे [२।५।२।३] श्रूयते—श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम्। श्रोत्रेण वाचं बहुधोद्यमानाम्। श्रोत्रेण मोदश्च महश्च श्रूयते। श्रोत्रेण सर्वा दिश आशृणोमि ॥ इति। हे **यजत्राः** यजनीयाः पूजनीया देवाः, **अक्षभिः** अक्षिभिः चक्षुर्भिः **भद्रम्** शुभम् **पश्येम** अवलोकयेम। युष्माकं पूजनपरा वयं मा तावत् खलानां समुन्नतिं साधूनामधोगतिं धर्मस्य विशरणम् अधर्मस्याभ्युत्थानम् जनानाम-कालमरणानि बलवतां च पिशाचचेष्टितानि द्राक्ष्म, प्रत्युत साधूनां समुन्नतिं खलानां सौशील्यम्, धर्मस्याभ्युत्थानम्, अधर्मस्य समूलनाशम्, तरुणानां कर्तव्यपरायणतां बलीयसां च दुर्बलरक्षणं प्रत्यक्षीकुर्याम। तथाच तैत्तिरीयब्राह्मणे [२।५।१।२] श्रूयते—अनन्धाश्चक्षुषा वयम्। जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम् ॥ इति। **स्थिरैः** दृढ़तरैः अचपलैश्च **अङ्गैः** अवयवैः **तनूभिः** शरीरैश्च देवान् **तुष्टुवांसः** स्तुतवन्तः देवानां स्तुतिपरायणा इत्यर्थः। **यत् आयुः देवहितम्** देवः मनुष्येषु निहितम्, देवविहितमित्यर्थः।

तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतम् ॥

[ऋ० सं० ७।६६।१६] इति श्रुतेः "शतायुः पुरुषः" [तै० सं० १।५।२] "शतायुर्वै पुरुषः" [ऐतरेयब्राह्मण ७।७] इत्यादिश्रुतेश्च वर्षशत-परिमितम् । यच्छब्दश्रुतेस्तच्छब्दाध्याहारः । तत् **व्यशेम** निराबाधमधिगच्छेम । "नातः पापात् पापीयोऽस्ति यदनुपकरणस्य दीर्घमायुः", अत एव सर्वभोगोपकरणसम्पन्नाः शारीरं स्वास्थ्यमनु-भवन्तो यथाविधि देवतोपस्थानमनुतिष्ठन्तः शतं संवत्सरान् जीवेम ।

सहृदयशिरोमणिना भर्तृहरिणा गीतम्—

क्वचिद्वीणावाद्यं क्वचिदपि च हाहेति रुदितं
क्वचिन्नारी रम्या क्वचिदपि जराजर्जरवपुः ।
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहो
न जाने संसारः किममृतमयः किं विषमयः ॥

इति । तत् संसारोऽयममृतमय एव नोऽस्तु न पुनर्विषमयः । मन्त्रेऽत्र परिसंख्यालङ्कारः ॥ तल्लक्षणं च काव्यप्रकाशे—"किञ्चित् पृष्टमपृष्टं वा कथितं यत् प्रकल्पते । तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥" इति । ८ ॥

स्कन्दस्वामिभाष्यम् । युष्मत्प्रसादादेव भद्रं कर्णेभिः शृणुयाम हे देवाः । भद्रमेव पश्येम अक्षभिः यजत्राः यष्टव्याः । स्थिरैरङ्गैः दृढैश्चात्मावयवैः तनूभिः शरीरैश्च । जरयानुपहतशरीरतदवयवाः सन्तः इत्यर्थः । तुष्टुवांसः । शत्रर्थोऽयं वसुर्द्रष्टव्यः । स्तुवन्तो युष्मान् । व्यशेम मनुष्याणां च देवहितं देवैर्दत्तं देवैर्वा निहितं स्थापितम् उपकल्पितं यदायुः तद्वर्षशतपरिमाणकम् आयुर्देवैर्मनुष्याणामुपकल्पितं कृत्स्नं प्राप्नुयाम । मान्तरा मृषीमहीत्यर्थः[1] ॥ ८ ॥

[1] This is the form in **आशीर्लिङ्**. In connexion with **मा, लुङ्** was expected. Should we read **मृष्महि** ?

महीधरभाष्यम्। तिस्रस्त्रिष्टुभः। हे देवाः, कर्णेभिः कर्णैः भद्रम् कल्याणम् अनुकूलं वयं शृणुयाम। हे यजत्राः, यजन्तं त्रायन्ते रक्षन्तीति यजत्राः यजमानपालकाः[1] अक्षभिः नेत्रैः भद्रं वयं पश्येम। "बहुलं छन्दसि"[2] [७।१।७६] इति हलादावक्षिशब्दस्यानङ्-देशः[3]। किंच देवहितं देवैः स्थापितं देवानां हितं देवोपासन-योग्यं वा यदायुः जीवनं तद् वयं व्यशेमहि व्यश्नुवीमहि प्राप्नुयाम। कीदृशा वयम्? स्थिरैः दृढैः अङ्गैः अवयवैः करचरणादिभिः तनूभिः शरीरैश्च पुत्रादिभिर्वा युताः तुष्टुवांसः भवतः स्तुवन्तः सन्तः॥ ८॥

उवटः। कर्णेभिः कर्णाभ्याम्[4]।..यजत्राः यजनीयाः। स्थिरैः अशिथिलैः..तुष्टुवांसः देवान् स्तुतवन्तः। तनूभिः भार्यापुत्रादि-

How curious!

[2] The relevant rule is **छन्दस्यपि दृश्यते** vii. i. 76.

[3] **अक्षभिः**—In the classical language **अक्षन्** is found only before vocalic endings beginning with the instrumental sing. In the earlier language, however, other forms are met with. Thus in the Maitrāyaṇī and Kāṭhaka Saṃhitās, we find *akṣāṇi*. The stem occurs in the well-known expression **अक्षण्वत्** also. The Kāsikī on **छन्दस्यपि दृश्यते** is interesting: **अस्थिदधिसक्थ्यक्ष्णामनङ्, छन्दस्यपि दृश्यते। यत्र विहितस्ततोऽन्यत्रापि दृश्यते। अचीत्युक्तमनजादावपि दृश्यते। इन्द्रो दधीचो अस्थभिः [ऋ०सं० १।८९।८]। तृतीयादिष्वित्युक्तम्, अतृतीयादिष्वपि दृश्यते। अस्थान्युत्-कृत्य जुहोति। विभक्तावित्युक्तम्, अविभक्तावपि दृश्यते। अक्षण्वता लाङ्गलेन। अस्थन्वन्तं यदनस्था बिभर्ति [ऋ० सं १।१६४।४]।**

[4] Acc. to Vāmana's dictum: **स्तनादीनां द्वित्वाविष्टा जातिः प्रायेण।**

काभिस्तनूभिः सहिताः।..देवहितं देवैर्यत् स्थापितं मनुष्याणामायुः।

सायणभाष्यम्। अस्ति सौम्यचरुस्तृतीयसवने। तेन चरुणा देवतामिष्ट्वा शेषे तस्मिन्बहु घृतमवनीय तस्मिन्वषट्कर्त्रा स्वकीया छाया द्रष्टव्या। सा यदि न दृश्येत तदानीं "भद्रम्" इत्येका पठितव्या। "त्वं सोम" इति खण्डे तथैव सूत्रयते। "राज्ञा सोमेन तद्वयमस्मासु धारयामसि भद्रं कर्णेभिः शृणुयाम देवा इति च" [आ० श्रौ० सू० ५।१९] इति॥ महानाम्नीव्रतेऽप्येषा भूमिस्पर्शने जप्या। सूत्रितं च "एतद्विदम्" इति खण्डे। "भद्रं कर्णेभिः शृणुयाम देवाः शं न इन्द्राग्नी भवतामवोभिः" [आ० श्रौ० सू० ८।१४] इति।

हे देवा दानादिगुणयुक्ताः सर्वे देवाः कर्णेभिरस्मदीयैः श्रोत्रैर्भद्रं भजनीयं कल्याणं वचनं शृणुयाम। युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम। अस्माकं बाधिर्यं कदाचिदपि मा भूत्[1]। हे यजत्रा यागेषु चरुपुरोडाशादिभिर्यष्टव्या देवा अक्षभिरक्षिभिरात्मीयैश्चक्षुर्भिर्भद्रं शोभनं पश्येम। द्रष्टुं समर्थाः स्याम। अस्माकं दृष्टिप्रतिघातोऽपि मा भूत्। स्थिरैर्दृढरङ्गैर्हस्तपादादिभिरवयवैस्तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसो युष्मान् स्तुवन्तो यदायुः षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा[2] देवहितं देवेन प्रजापतिना स्थापितं तद्व्यशेम। प्राप्नुयाम॥ कर्णेभिः। "बहुलं

[1] Sāyaṇa built better than he knew—May we not be like men who have eyes but see not, who have ears but hear not! Cf. **नयन तोमारे पाय ना देखिते, र'येछ नयने नयने.**

[2] S. is here thinking of the ṣoḍaś'ottarīya and viṃś'ottarīya das'as of Astrology. Even poets speak of a hundred years as the span of life allotted to man. Thus Bhartṛhari says in his Vairāgya-s'ataka :

छन्दसि" [७।१।१०] इति भिस ऐसभावः। अक्षभिः। "छन्दस्यपि दृश्यते" [७।१।७६] इत्यनङ् स चोदात्तः। यजत्राः। "अमिनक्षि०" [उ०३।९८] इत्यादिना यजेरत्रन्प्रत्ययः। तुष्टुवांसः। ष्टुञ् स्तुतौ। लिटः क्वसुः। "शर्पूर्वाः खयः" [७।४।६१] इति तकारः शिष्यते। अशेम। अशू व्याप्तौ। "लिङ्याशिष्यङ्" [३।१।८६]। यदि तु तत्र परिगणनमन्यव्यावृत्त्यर्थं[1] तदानीं लिङि व्यत्ययेन शप्। देवहितम्। "तृतीया कर्मणि" [६।२।४८] इति पूर्वपदप्रकृतिस्वरत्वम्॥ ८॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः।
शेषं व्याधिवियोगदुःखसहितं सेवादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम्॥

Acc. to the Bible the span of life is "three score years and ten" though the mention of a hundred years is sometimes met with.

"The days of our age are three score years and ten; and though men be so strong that they come to four score years, yet is their strength then but labour and sorrow; so soon passeth it away, and we are gone." Psalm xc. 10. "There shall be no more then an infant of days, nor an old man that hath not filled his days: for the child shall die an hundred years old." Isaiah lxv. 20.

[1] In the Bhāṣya on लिङ्याशिष्यङ् iii.1.86 we find: अयमाशिष्यङ् विधीयते तस्य किं प्रयोजनम्?

* आशिष्यङः प्रयोजनं स्थागागमिवचिविदयः।

स्था। उपस्थेयं वृषभं तुग्रियाणाम्। गा। अञ्जसा सत्यमुपगेयम्¶। गमि।

¶ In VS. v.5, TS. i.2.10.2. GB. ii.2.3, S'B. iii.4.2.14, ĀS'S. iv.5.3, S'S'S. v.8.2, LS'S. v.6.6, S'GS. i.6.5 we find उपमेषम्. In MS i.2.7 and KS. ii.8 occurs उपागाम्.

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। हे देवाः इन्द्रादयः भद्रं कल्याणं श्रुतिस्मृतिवाक्यरूपं कर्णेभिः आचार्यान्तेवासिरूपाणाम् ऋत्विग्यजमानरूपाणां वास्माकं बहूनां कर्णैः शृणुयाम युष्मत्-प्रसादात् सर्वदा श्रोतुं समर्थाः स्याम, श्रुत्वा च **यजत्राः** यागक्षमा[1] वयम् भद्रं कल्याणं यज्ञादिकं कर्म अक्षभिः चक्षुरिन्द्रियैः[2] साक्षात् पश्येम। स्थिरैः अविकलैः अङ्गैः चक्षुरादिभिर्हस्तादिभिश्चावयवैः तनूभिः तथाविधशरीरैः युक्ता वयं तुष्टुवांसः युष्मदीयां स्तुतिं कुर्वाणा यत् यस्मात् कारणात्[3] देवहितम् देवेन प्रजापतिना समर्पितं सर्वमपि आयुः व्यशेम विशेषेण प्राप्नवाम। तस्मादपमृत्योरभावाच्चिरं भद्रं शृणुयामेति पूर्ववान्वयः॥ ८॥

यज्ञेन प्रतिष्ठां गमेयम्। वचि। मन्त्रं वोचेमाग्नये। विदि। विदेयमेनां मनसि प्रविष्टाम्।

*** शकिरुह्योश्च।**

शकिरुह्योश्चेति वक्तव्यम्। शकेम त्वा समिधं साधया धियः। अस्रवन्तीमारुहेमा स्वस्तये।

*** दृशेरक् पितरं च दृशेयं मातरं च।**

दृशेरग् वक्तव्यः। पितरं च दृशेयं मातरं च दृशेयमित्येवमर्थम्।

In the N. S. Press ed. we find [**मातरं च**] **दृशेयम्** both in the Vārttika and in the Bhāṣya. In the critical edition of Kielhorn [**मातरं च**] **दृशेयम्** occurs in the Bhāṣya alone and not in the


[1] The suffix has been added in the **कर्मवाच्य** in the sense of **तव्य**, so this meaning has to be rejected.

[2] S. evidently takes **अक्ष** in the sense of **इन्द्रिय** and states the secondary meaning **चक्षुरिन्द्रियैः**, **साक्षात्** would therefore appear to be unnecessary.

[3] **यत्** cannot mean **यस्मात् कारणात्** here.

Vārttika. पितरं च दृशेयं मातरं च is the last pāda of RV. 1.24. 1 and 2 and occurs unchanged in the Kās'ikā. The second दृशेयम् would therefore appear to be a reader's note and should be expunged from the Bhāṣya.

The Vārttikakāra has enumerated the roots which come under the scope of this rule, but अश् is not mentioned by him. So if the list be regarded as exhaustive, the rule does not apply and we are to invoke the aid of व्यत्यय. If, however, the list be regarded as merely illustrative, then there is no difficulty.



पुत्रासः । यत्र । पितरः । भवन्ति ।

मा । नः । मध्या । रिरिषत । आयुः । गन्तोः ॥ ९ ॥

वेङ्कटमाधवव्याख्यानम् । शतम् [इन्नु] एव शरदः [अन्ति] अन्ततः भवति[1] देवा मनुष्याणामायुः । यत्र [नः] अस्माकम् [चक्रा] कृतवन्तः यूयम् अङ्गानां [जरसम्] जरां कल्पितवन्तः[2] । [पुत्रासः] पुत्रा एव [पितरः] रक्षितारः यत्र भवन्ति तद् आयुः गन्तोः [मध्या] मध्ये मा [नः] अस्मान् [रीरिषत] हिंसिध्वम्[3] इत्यायुष आशासनम् ॥ ९ ।

काश्यशक्षितीशचन्द्रभाष्यम् । रिष्टासङ्गावं प्रार्थयते—शतमिदिति । हे देवाः, **शतम्** शतसंख्याकाः **इत् नु** एव **शरदः** संवत्सराः **अन्ति** पुरतो नो वर्तन्ते इति शेषः । **यत्रा** यत्र वर्षशत-परिमिते आयुषि **नः** अस्माकं **तनूनाम्** शरीराणां **जरसम्** विस्रसाम् अपक्षयम् **चक्रा** चक्र विहितवन्तो यूयमिति शेषः । **यत्र** वर्षशते **पुत्रासः** पुत्राः **पितरः भवन्ति** पितृपदम् अधिगच्छन्ति । ये तावत् पूर्वमस्माभिः सयत्नं पोषिताश्च परिवर्द्धिताश्च त एव पुत्रा यदा वलिसमाक्रान्तावयवानां पलितशिरसां स्वकार्यक्षमाणामस्माकं पालनं पोषणं च विदध्युः । **गन्तोः** गमनस्य **मध्या** मध्ये यदायुः प्रचलति

[1] V. construes **भवति** with **आयुः** understood.

[2] **कल्पितवन्तः** is unnecessary, because of the preceding **कृतवन्तः**.

[3] This is the reading in the edition of Sarup who notes the variant **हिंसितध्वम्**. Both forms are ungrammatical. Read **हिंसिष्ट**.

तदा, तस्यायुषः शेषे इत्यर्थः। **नः** अस्माकम् **आयुः** जीवितकालं **मा रीरिषत** मा हिंसिष्ट। भवतां प्रसादेन सर्वासां रिष्टीनां भङ्गो भवतु, वयं च भवद्भिः परिकल्पितं वर्षशतमायुर्लभेमहि, पुत्राश्च नो वार्धके भक्तिभराप्लुतचेतसः सेवां कुर्वन्तु ॥ ९ ॥

शतपथब्राह्मणम् (२।३।३।१—६)। यत्र वै प्रजापतिः प्रजाः ससृजे। स यत्राग्निं ससृजे स इदं जातः सर्वमेव दग्धुं दध्रे। इत्येवाबिलमेव ता यास्तर्हि प्रजा आसुः। ता हैनं सम्पेष्टुं दध्रिरे। सोऽतितिक्षमाणः पुरुषमेवाभ्येयाय ॥ स होवाच न वा अहमिदं तितिक्षे, हन्त त्वा प्रविशानि, तं मा जनयित्वा बिभृहि; स यथैव मां त्वमस्मिल्लँोके जनयित्वा भरिष्यसि, एवमेवाहं त्वाममुष्मिल्लँोके जनयित्वा भरिष्यामीति ॥ तथेति तं जनयित्वाबिभः। स यदग्नी आधत्ते तदेनं जनयति, तं जनयित्वा बिभर्ति। स यथा हैवैष एतस्मिल्लँोके जनयित्वा बिभर्ति, एवमु हैवैष एतममुष्मिल्लँोके जनयित्वा बिभर्ति ॥ तन्न साम्युद्वासयेत। सामि हास्मै स ग्लायति। स यथा हैवैष एतस्मा अमुष्मिल्लँोके सामि ग्लायति—एवमु हैवैष एतस्मा अमुष्मिल्लँोके सामि ग्लायति। तस्मान्न साम्युद्वासयेत ॥ स यत्र म्रियते, यत्रैनमग्नावभ्यादधाति, तदेषोऽग्नेरधिजायते, स एष पुत्रः सन् पिता भवति ॥ तस्मादेतदृषिणाभ्यनूक्तम्—शतमिन्नु शरदो अन्ति देवाः। यत्रा नश्चक्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति। मा नो मध्या रीरिषतायुर्गन्तोः ॥ इति। पुत्रो ह्येष सन्त्स पुनः पिता भवति। एतन्नु तद् यस्मादग्नी आदधीत ॥

शतपथब्राह्मणसायणभाष्यम्। दध्रे उद्युक्तो बभूव। . . . अतितिक्षमाणः प्रजाभिश्चिकीर्षितं पेषणमसहमानः। . . . एवमग्न्याधानेन जनितस्याग्नेर्भरणं विधाय, तस्य भरणात् प्राक् उद्वासनं निषेधति—तन्नेति। सामि मध्ये यद्यग्निम् उद्वासयेत विसृजेत्, तर्हि अस्मै

यजमानाय सः अग्निः सामि अर्धग्लानियुक्तो भवति । . . . पुत्रः सन् पिता भवतीति । यजमानस्य जीवनावस्थायामाधानेनोत्पादितत्वादग्निस्तस्य पुत्रः, मरणादूर्ध्वन्तु तस्मादग्नेर्यजमानस्य जननात् पुत्र एव तस्य पिता भवतीत्यर्थः ।

हे देवाः, अन्ति अन्तिके, मनुष्याणां समीपे आयुष्ट्वेन परिकल्पिताः शतं शतसंख्याका एव शरदः संवत्सराः खलु यत्र यस्मिन् आयुषि शतसंवत्सरे तनूनां शरीराणां जरां चक्रा कृतवन्तः, यत्र य पुत्रासः [पुत्राः] सन्तोऽपि अपत्योत्पादनेन पितरो भवन्ति, नः अस्माकं तत् आयुः गन्तोः गमनात् पूर्वं मध्या मध्ये मा रीरिषत हिंसनं मा कृषतेति [? काष्टति] ।

स्कन्दस्वामिभाष्यम् । इत् नु इति पदपूरणे । एकवाक्यताप्रसिद्ध्यर्थं च प्रथमे पादे यच्छब्दोऽन्त्ये च षष्ठ्यन्तस्तच्छब्दोऽध्याहर्तव्यः । यदेतत् शतं शरदः वर्षशतम् अन्ति अन्तिकं सन्निकृष्टम् । अल्पमित्यर्थः । हे देवाः, यत्र नः अस्माकम् चक्र कृतवन्तः स्थ जरसम् जराम् तनूनाम् शरीराणाम् । यत्[1] स्वरूपेणैवाल्पकं जरया चोपहतमित्यर्थः । यत्र च पुत्रासः पुत्राः पितरो भवन्ति स्वेषामपत्यानाम् । यत्रैकमेव शरीरमत्यन्तविरुद्धे पितापुत्रावस्थे शीघ्रमेव प्रतिपद्यत इत्यर्थः । अथवा पितृशब्दोऽत्र क्रियापरः पालयितृवचनः । ये पुत्राः पाल्या आसंस्ते एव वार्धक्ये जरयाभिभूतस्य पालयितारो भवन्तीत्यर्थः । मा नः अस्माकं तस्य मध्या मध्ये रिरिषत हिंसिष्ठा[2] । आयुर्जीवितं गन्तो र्गमनशीलस्य ॥ ९ ॥

उवटभाष्यम् । शतमपि शरदः अन्ति अन्तिके समीपे भवथ[3]

[1] **यत्** refers to **वर्षशतम्** or rather to **आयुः** in the mind of the writer.

[2] Read **रीरिषत हिंसिष्ट.** [3] Should we read **भवत** ?

हे देवाः। आकल्पकालमित्यर्थः। ऋषिभिरुदितमेतत्। यत्र यस्मिन् शरदां शते नः अस्माकं यूयं चक्र कृतवन्तः जरसं जरां तनूनां जरानिमित्तामशक्तिमित्यभिप्रायः। किञ्च पुत्रासो यत्र पितरो भवन्ति पुत्रा अग्नयः यत्र शरदां शते यजमानस्स पितरो जनितारो[1] भवन्ति। तदुक्तम्—"तत्र वै प्रजापतिः प्रजाः ससृजे" इत्युपक्रम्य "तस्माज्जनयित्वा बिभृहि"[2] इति। यत्र पितरो भवन्ति। एतदप्युक्तमेव। "स यत्र म्रियते यत्रैनमग्नावभ्यादधाति तदेषोऽग्नेरधिजायते, स एष पुत्रः सन् पिता भवति"[2] इति। अथवा पुत्रा एव पितॄणामौर्ध्वदेहिकं कुर्वाणाः पितरो यत्र सम्पद्यन्ते तदपि शरदां शतमन्तिक एवेति। यत एवमतो ब्रूमः। मा नो मध्या रीरिषतायुर्गन्तोः। मा रीरिषत मा हिंसिष्ट[3] नः अस्माकं मध्या मध्ये अकाल एव आयुः गन्तोः। गन्तृ गमनशीलम्। उक्तं च—

सञ्चिन्त्य सञ्चिन्त्य तमुग्रदण्डं
मृत्युं मनुष्यस्य विचक्षणस्य।
वर्षासु सिक्ता इव चर्मबन्धाः
सर्वे प्रयत्नाः शिथिलीभवन्ति॥

इति॥ ९॥

महीधरभाष्यम्। हे देवाः, शतम् इत् शतमपि शरदः वर्षाणि शतवर्षपर्यन्तं यूयम् अन्ति अन्तिके समीपे भवतेति शेषः। यत्र शरच्छते नः अस्माकं तनूनां शरीराणां यूयं जरसं जरां चक्र

[1] The printed text has **जनितारः** which is an **आर्ष** form acc. to **जनिता मन्त्रे.** Should we read **जनयितारः ?**

[2] The entire passage from the S'atapatha Brāhmaṇa is printed on pp. 45-46.

[3] The printed text has **मा रीरिषत् मा हिंसीष्ट !**

कुरुथ[1]। करोतेर्लिटि मध्यमबहुवचनम्। "द्व्रचोऽतस्तिङः" [६।३।१३५] इति चक्रेत्यस्य संहितायां दीर्घः। "निपातस्य च"[2] [६।३।१३६] इति यत्रेत्यस्य दीर्घः। वार्धकावधि यूयं समीपे भवतेत्यर्थः। यत्रास्माकं जरायां पुत्रासः अस्मत्पुत्राः पितरो भवन्ति पुत्रवन्तो भवन्ति, यावदस्माकं पौत्रा भवन्तीत्यर्थः। तावत् मध्या मध्ये नः अस्माकम् आयुः मा रीरिषत मा हिंसिष्ट। रिषतेर्हिंसार्थस्य णिजन्तस्य चङि रूपम्। कीदृशम् आयुः? गन्तोः गन्तृ गमनशीलम्। तदुक्तम्—

सञ्चिन्त्य सञ्चिन्त्य तमुग्रदण्डं
मृत्युं मनुष्यस्य विचक्षणस्य।
वर्षासु सिक्ता इव चर्मबन्धाः
सर्वे प्रयत्नाः शिथिलीभवन्ति॥

इति॥ ९॥

सायणभाष्यम्। हे देवाः। अन्त्यन्तिके मनुष्याणां समीप आयुष्ट्वेन भवद्भिः कल्पिताः शरदः संवत्सराः शतमिन्नु शतं खलु। यस्मात्सृष्टिकाले मनुष्याणां शतं संवत्सरा आयुरिति युष्माभिः परिकल्पितं तस्मान्नोऽस्माकमायुर्गन्तोः[3] क्लृप्तस्यायुषो

[1] **अकुरुत** would appear to be the correct reading.

[2] The special rule **ऋचि तु-नु-घ-मक्षु-तङ्-कु-त्रोरुष्याणाम्** vi.3.133 is applicable here. Mahidhara evidently regards **कुत्र** as one word, though it is usual to take **कु** and **त्र** separately.

[3] **गन्तोः—क्लृप्तस्यायुषो गमनात् पूर्वं मध्या मध्ये**—This is rather cumprous. **गन्तोः** is a Gen. infinitive governed by the preposition *madhyā'*, the Instr. sing of *ma'dhya* with adverbial shifting of accent. Cf. **मध्या कर्तोर्विततं सं जभार** RV. i. 115. 4. Similarly, we have in Greek the preposition *a'no:*, the Inst. sing. of *ana'*, governing the Gen., *e.g.*, *ano: tou: gona'tos* above the knee.

गमनात्पूर्वं मध्या मध्ये मा रीरिषत। मा हिंसिष्ट। कीदृशानाम्[1] ? नोऽस्माकं तनूनां शरीराणां जरसं जरां यत्र यस्यामवस्थायां चक्र कृतवन्तो यूयम्। यत्र च पुत्रासः पुत्राः पितरोऽस्माकं रक्षितारो भवन्ति। ईदृग्दशापन्नानामित्यर्थः॥ अन्ति। अन्तिकशब्दस्य "कादिलोपा[2] बहुलमिति वक्तव्यम्" [काशिका ६।४।१४९] इति कलोपः। यत्रा। "ऋचि तुनुघमक्षुतङ्कुत्र०" [६।३।१३३] इति संहितायां दीर्घः।

[1] All the printed editions read कीदृशान् and ईदृग्दशापन्नान्, but there is no Acc. pl. in the previous clause to which कीदृशान् can refer.

[2] अन्तिकशब्दस्य कादिलोपो बहुलमिति वक्तव्यमिति कलोपः *i.e.*, in the matter of the elision of the portion beginning with *k* of *antika* we should use the word *bahulam*. This is found in the Kās'ikā [which reads कादिलोपे], giving the substance of the S'lokavārttika under vi. 4. 149 :

तसीत्येष न वक्तव्यो दृष्टो वाशतयेऽपि हि।
घौ लोपऽन्तिषदित्यत्र तथाघौ येऽन्त्यथर्वसु॥


Kaiyaṭa explains : तसीत्येष इति। कादिलोपश्च बहुलमित्यव विषयमनुपादाय पठितव्यमित्यर्थः।...घु-शब्देनोत्तरपदं पूर्वाचार्यप्रसिद्धयोच्यते। ...अघाविति। अनुत्तरपदे इत्यर्थः। The example from the Atharva Veda is अन्तिये च दूरके. The S'lokavārttika and the example given in the Mahābhāṣya appear to be based on a vicious reading of the hemistich अरसास इहाह्यो ये अन्ति ये च दूरके x. 4. 9. अन्ति occurs again in AV. x. 8. 32: अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति and in AV. xviii. 3.23 आ यूथेव क्षुमति पश्वो अख्यद्देवानां जनिमान्त्युग्रः where S. says : अन्ति अन्तिके समीपे। कादिलोपो बहुलमिति वक्तव्यमित्यन्तिकशब्दस्य कादिलोपः. The truth is rather the other way about. Skt. अन्ति is an independent adverb. From it is derived अन्तिक with the suffix क. In Gk. *anti* means 'opposite', *a'nta* 'face to face', Lat. *ante* 'before'.

चक्रा[1]। लिटि मध्यमबहुवचनस्य कित्त्वाद् गुणाभावे यणादेशः। "द्व्यचोऽतस्तिङः" [६।३।१३५] इति संहितायां दीर्घत्वम्। जरसम्। "जरायाजरसन्यतरस्याम्" [७।२।१०१] इति जरसादेशः। मध्या। "सुपां सुलुक्०" [७।१।३९] इति सप्तम्या डादेशः। रीरिषत। रिष रुष हिंसायाम्। अस्माण्णिजन्तात्[1] माङि लुङि मध्यमबहुवचने च्लेश्चङि णिलोपोपधाह्रस्वद्विर्वचनहलादिशेषसन्वद्भावेत्त्वदीर्घाः। छान्दसः पदकालीनो ह्रस्वः। गन्तोः। भावलक्षणे "स्थेण्०"[3] [३।४।१६] इति गमेस्तोसुन्प्रत्ययः।

[1] **चक्रा**—In the Paspaśāhnika of the Mahābhāṣya we find : **सन्ति वै शब्दा अप्रयुक्ताः। तद् यथा—ऊष तेर चक्र पेचेति। ...ये चाप्येते भवतोऽप्रयुक्ता अभिमता एतेषामपि प्रयोगो दृश्यते। क्व ? वेदे। यद्वो रेवती रेवत्यं तदूष। यन्मे नरः श्रुत्यं ब्रह्म चक्र। यत्रा नश्चक्रा जरसं तनूनामिति।**

[1] **रिष रुष हिंसायाम्—अस्मात् ण्यन्तात्.** We may say : **रिष हिंसायाम्। अस्मात् ण्यन्तात्** or **रिष रुष हिंसायाम्। रिषेर्ण्यन्तात्।**

[3] **गन्तोः। भावलक्षणे स्थेण् इति गमेस्तोसुन्प्रत्ययः**—Unfortunately for S. the rule does not include **गम्**, and **इण्** cannot represent **गम्** here. He might have said **ईश्वरपदासन्निधानेऽपि तोसुन्प्रत्ययः.**



विश्वे देवा अदितिः पञ्च जना

अदितिर्जातमदितिर्जनित्वम् ॥ १० ॥

अदितिः । द्यौः । अदितिः । अन्तरिक्षम् ।

अदितिः । माता । सः । पिता । सः । पुत्रः ।

विश्वे । देवाः । अदितिः । पञ्च । जनाः ।

अदितिः । जातम् । अदितिः । जनित्वम्* ॥ १० ॥

ऐतरेयब्राह्मणम् । पाञ्चजन्यं वा एतदुक्थं यद्वैश्वदेवम्, सर्वेषां वा एतत् पञ्चजनानामुक्थं—देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च । एतेषां वा एतत् पञ्चजनानामुक्थं सर्व एनं पञ्चजना विदुः ।...अदितिर्द्यौरदितिरन्तरिक्षमित्युत्तमया परिदधाति । इयं

* With this verse we may compare the sublime Greek inscription on an Egyptian temple to the Goddess Neith: *Ego: eimi pan to gegonos kai on kai esomenon kai ton emon peplon oudeis po: thne:tos apekalupsen.* 'I am all that is and that was and that shall be, and no mortal hath lifted my veil.'

वा अदिति द्यौरियमन्तरिक्षम् इति। अदितिर्माता स पिता स पुत्र इति। इयं वै माता, इयं पिता, इयं पुत्र इति। विश्वे देवा अदितिः पञ्चजना इति। अस्यां वै विश्वे देवा अस्यां पञ्चजना इति। अदितिर्जातमदितिर्जनित्वम् इति। इयं वै जातमियं जनित्वम् ॥१३।७॥

वेङ्कटमाधव-व्याख्यानम्। अदितिरेव सर्वमित्यदितेर्विभूतिमाचष्टे —अदितिरेव जातम् अदितिरेव [जनित्वम्] जनिष्यमाणं सा च [1]प्रयच्छत्वायुरिति ॥१०॥

काश्यपक्षितीशचन्द्रभाष्यम्। सर्वभूतान्तरात्मानमदितिं प्रशंसन्नुपसंहरति—अदितिर्द्यौरिति। **अदितिः द्यौः** यस्य किल महिमेदृक्तयेयत्तया वा परिच्छेत्तुं न शक्यते स द्युलोकोऽप्यदितिरेव। **अदितिः अन्तरिक्षम्।** अनन्तविस्तारमन्तरिक्षमप्यदितिरेव। **अदितिः माता स पिता स पुत्रः।** संसारस्यालम्बनानि पितृमातृपुत्रा अप्यदितिरेव। **अदितिः जातम् अदितिः जनित्वम्** किं बहुना यद् यत् किल समुत्पन्नं यद् यच्च समुत्पत्स्यते सर्वं खल्वदितिरेव। सेयं सर्वमयी सर्वशक्तिरदितिः संसारपाशान्नश्छिनत्तु ॥

"स पिता स पुत्रः" इत्यत्र विधेयप्राधान्यात् पुंस्त्वेन निर्देशः, "तिस्रो द्यावः सवितुर्द्वा उपस्था" [ऋ० सं० १।३५।६] इत्यत्र यथा। "अयं मातायं पितायं जीवातुरागमत्। इदं तव प्रसर्पणं सुबन्धवेहि निरिहि ॥" [ऋ० सं० १०।६०।७] इत्यत्र पुनरुद्देश्यानुरोधेन पुंस्त्वेन निर्देशः। महर्षिणा पाणिनिनापि "णेरणौ **यत् कर्म** णौ चेत् **स**

1 Laksman Sarup prints: "**प्रयच्छतायुरिति (?)**" and notes the variant **प्रयच्छथायुः** but the correct reading is either **प्रयच्छतादायुः** or **प्रयच्छतामायुः** or **प्रयच्छत्वायुः**. Of these **प्रयच्छत्वायुः** makes the least departure from the MSS, though **प्रयच्छतादायुः** sounds better in such cases.

कर्तानाध्याने" [१।३।६७] इत्यत्र विधयानुरोधेन स इति पुंलिङ्गेन निर्देशः कृतः, "कर्मणा यमभिप्रैति **स सम्प्रदानम्**" [१।४।३२] इत्यत्र पुनरुद्देश्यानुरोधेन तथा विहितः। अत एव कैयटेनोक्तम्—उद्दिश्यमानप्रतिनिर्दिश्यमानयोरेकत्वमापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गमुपाददत इति। व्याख्यातं च नागेशेन—सिद्धवत् कीर्तनमुद्देशः, प्रतिपाद्यतया विधेयतया वा कीर्तनं प्रतिनिर्देशः। यथा "शैत्यं हि यत् सा प्रकृतिर्जलस्य" [रघु० ५।५४] इत्यादौ स्त्रीलिङ्गनिर्देशः। तल्लिङ्गम् तयोर्लिङ्गमित्यर्थः" इति। जनित्वमित्यत्र "कृत्याथ तवैकेन्केन्यत्वनः" [३।४।१४] इति सूत्रेण कृत्यार्थे त्वन्प्रत्ययः ॥१०॥

निरुक्तम् (४।२३)। "अदितिर्द्यौः..." इत्यदितेर्विभूतिमाचष्ट, एनान्यदीनानीति वा।

दुर्गाचार्यभाष्यम्। राहूगणस्य गोतमस्येयमार्षम्। तृतीयसवन सर्वस्तोमेष्वेव वैश्वदेवस्य शस्त्रस्य परिधानीयैषा। अदितिः एव देवमाता द्यौः, अदितिः अदितिरेव च अन्तरिक्षम्। अदितिः एव माता सर्वभूतनिर्मात्री, स एव च पिता पालकः, स एव हि पुत्रः। सैव हि परितुष्टा सती स्तोतारं पुरुणो बहुनः पापात् त्रायते, अथवा सैव निपृणाति सर्वभूतानां यन्निपर्तव्यं दातव्यमित्यर्थः। येऽपि चैते विश्वे देवाः सर्वे देवाः, एतेऽपि अदितिरेव। पञ्चजनाः गन्धर्वादयः अदितिरेव। सर्वथापि किं बहुना, यावदेतत् किञ्चित् जातं च जनित्वं च जनिष्यमाणं च सर्वमप्येतत् अदितिरेव। इति एवमनेन मन्त्रेण मन्त्रदृक् अदितेर्विभूतिमाचष्टे, देवमातुस्तत् सर्वमप्युपपद्यत एव, माहाभाग्याद्देवतायाः। तदुत्तरत्र वक्ष्यामः। एवमैतिहासिकपक्षेण। नैरुक्तपक्षेण पुनः "एनानि" द्युलोकादीनि सर्वाणि अदीनानि अनुपक्षीणानि इति योज्यम्। न ह्येषां क्षयोऽस्तीति।

महेश्वरभाष्यन्। देवमातृत्वाददितेः, द्युप्रभृतयस्तत्प्रभवाः। तेषां

तत्प्रभवत्वाच्च तच्छब्देनैवाभिधानम्। अदितिप्रभवा द्यौरित्यर्थः। एवमेव अदितिरन्तरिक्षम्। अदितिप्रभवत्वादित्यर्थः। अदितिर्माता। सः। स इति लिङ्गव्यत्ययः। सैव पिता, सैव पुत्रः। विश्वे देवा अदितिः। पञ्च जनाश्च गन्धर्वादयः। निषादपञ्चमा वा वर्णाः। किं बहुना। अदितिरेव जातम्। अदितिरेव जनित्वम् जनिष्यमाणमित्यर्थः। एवं लोके यावद् द्युवियन्मातृपितृपुत्रादि सम्मतं तत् सर्वं तत्प्रभवत्वाददितिरिति, कृत्स्नस्य जगतस्तत्प्रभवत्वेन। एवमदितेर्विभूतिमाचष्ट मन्त्रो मन्त्रदृग्वा। अदीनपर्यायो वा नैरुक्तपक्षेऽदितिशब्दो न देवमातृवचनः। अत आह—एनान्यदीनानीति वा इति। अक्षीणा द्यौः तथान्तरिक्षादीनि। अध्यात्ममपि। अदितिः प्रकृतिः कारणं ब्रह्म। प्रकृतिसार्वनाम्याच्च तत्प्रभवत्वे सति सर्वमदितिरिति व्याख्येयम्।

स्कन्दस्वामिभाष्यम्। अदितिर्देवमाता। तत्प्रभवाः सर्वे द्युवादयः[1]। अत इदं कारणशब्देन कार्यस्य गौण्या वृत्त्याभिधानम्। अदितेः कार्यभूतेत्यदितिरेवान्तरिक्षम्। अदितिरेव माता स पिता स पुत्रः। स इति व्यत्ययेन पुंलिङ्गता। सैवादितिः पिता सैव पुत्रः। विश्वे देवा अदितिः पञ्च जनाश्च। गन्धर्वाः पितरो देवा असुरा रक्षांसीति एते पञ्च जना अभिप्रेताः, निषादपञ्चमा वा ब्राह्मणादयो वर्णाः। अदितिरेव जातम् अदितिरेव जनित्वं जनिष्यमाणम्। एवमशेषजगत्कारणत्वेनादितेर्विभूतिमाचष्टे। अथवा, अदितिशब्दोऽपि क्रियाशब्दोऽदीनपर्यायः। द्युवादीनि वस्तून्यदीनान्यनुपक्षीणानि। नित्यानीत्यर्थः॥१०॥

महीधरभाष्यम्। मन्त्रदृक् सर्वात्मकत्वेनादितिं स्तौति। द्यौः स्वर्गोऽदितिस्तदधिष्ठातृत्वात्। एवमग्रेऽपि। अन्तरिक्षम् अदितिः

[1] Skandasvāmin evidently forms **दिव्** with **विच्** and the word being a **धातु**, **अचिश्नुधातुभ्रुवाम०** vi.4. 77 applies after the change of **व्** to **उ** by **दिव उत्** vi. 1. 131.

माता पुत्रश्च सः। सादितिरेव। लिङ्गव्यत्ययः। विश्वे सर्वे देवाः अदितिः। पञ्चजना मनुष्या अप्यदितिः। किं बहुना जातम् उत्पन्नं प्राणिजातम् जनित्वम् जनिष्यमाणं च सर्वम् अदितिरेव। यद्वा, अदितिर्मन्त्रेण नोच्यते, द्यौरित्यादीनि सर्वाणि जनित्वान्तानि अदितिः अदितीनि अदीनानि महाभाग्य[1]युक्तानि सन्तु ॥१०॥

सायणभाष्यम्। अदितिर्द्यौरदितिरित्येषादितिदेवताके पशौ हविषो याज्या। सूत्रितं च। "अदितिर्द्यौरदितिरन्तरिक्षं न ते विष्णो जायमानो न जातः" [आ० श्रौ० सू० ३।८] इति।

अदितिरदीनाखण्डनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः। सैवान्तरिक्षमन्तरा. द्यावापृथिव्योर्मध्य ईक्ष्यमाणं[2] व्योम। सैव माता निर्मात्री जगतो जननी। सैव पितोत्पादकः। ततश्च स पुत्रः। मातापित्रोर्जातः पुत्रोऽपि सैव। विश्वे देवाः सर्वेऽपि देवा अदितिरेव। पञ्च जना निषाद-पञ्चमाश्चत्वारो वर्णाः। यद्वा गन्धर्वाः पितरो देवा असुरा रक्षांसि। तदुक्तं यास्केन। "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके। चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः" [नि० ३।७] इति। ब्राह्मणे त्वेवमाम्नातम्। सर्वेषां वा एतत्पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च [ऐ० ब्रा० १६।७] इति, तत्र गन्धर्वाप्सरसामैक्यात्पञ्चजनत्वम्। एवंविधाः पञ्च जना अप्यदितिरेव। जातं जननं प्रजानामुत्पत्तिः। साप्यदितिरेव। जनित्वं जन्माधि-

[1] Yāska has **माहाभाग्य०**

[2] **अन्तरिक्ष**—would appear to have been derived from the root *kṣi* 'to dwell'. The derivation from *īkṣ* by popular etymology led to the spelling of the word with a long *ī* in later times.

करणं [1]तदप्यदितिरेव। एवं सकलजगदात्मनादितिः स्तूयते। उक्तं च यास्केन। "इत्यदितेर्विभूतिमाचष्टे" [नि० ४।२३] इति। अदितिः। दो अवखण्डन। अस्मात्कर्मणि क्तिनि 'द्यतिस्यतिमास्थामित्ति किति'[७।४।४०] इतीत्वम्। यास्कपक्षे तु दीङ् क्षय इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वम्। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम्। स पिता। निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकतामापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गतामुपाददत इत्युद्देश्यलिङ्गतया पुंलिङ्गत्वम्। जनित्वम। जनेरौणादिकस्त्वन्प्रत्ययः[2]। १०॥

सायणभाष्यम् (तैत्तिरीयारण्यकगतम्)। अदितिशब्दवाच्या देवता सर्वात्मकत्वेन स्तूयते—माता पृथिवी, अतो लोकत्रयात्मिका[2]। स देवताविशेषोऽदित्याख्यः। सर्वस्य जगतः पिता स एव पुत्रश्च। ये विश्वे देवाः सर्वेऽपि देवाः, ये च पञ्चजना निषादपञ्चमा ब्राह्मणक्षत्रियवैश्यशूद्रास्ते सर्वेऽप्यदितिरेव। जातं यत् पूर्वमुत्पन्नं जगत्, जनित्वं जननरूपो व्यापारः तत् सर्वमप्यदितिरेव॥ १०॥

[1] Under RV. 1. 66. 8 **यमो ह जातो यमो जनित्वम्** S. says **जनी प्रादुर्भावे। "कृत्यार्थे तवैकेन्०" इति कर्मणि त्वन्प्रत्ययः। इडागमः। नित्त्वादाद्युदात्तत्वम्।** This is the correct derivation. cf. **नहीन्वस्य प्रतिमानमस्त्यन्तर्जातेषूत ये जनित्वाः** RV. iv. 18. 4, 'for there is no match for him among those who have been born nor those who will be born" —"About a dozen gerundives ... end in *-tva* which seems to be the infinitive stem in *tu* turned into an adjective by means of the suffix *-a*". Macdonell, *Vedic Grammar*. When **जनित्वम्** is accented on the final syllable as in RV. x. 18. 8 **पत्युर्जनित्वमभि सं बभूव** it means **जनेर्भावः** and is formed with the taddhita suffix *-tva*.

[2] The Anandasrama edition reads: **अतो लोकत्रयात्मिकांश-देवताविशेषोऽदित्याख्यः** which is meaningless.

The word *diti* (Gk. *de-si-s*) derived from *dā* 'to bind' means 'binding'. Hence *aditi* means 'unbinding', 'boundlessness'. Aditi is thus often invoked for the release of people from all bonds—from the bonds of sin and sorrow : **अनागास्त्वं नो अदितिः कृणोतु** 1.162.22 ; **विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः** v. 36. 3. She is the universal Goddess : **या प्राणेन सम्भवत्यदितिर्देवतामयी** (Kaṭhopaniṣad, ii,1.7).

English Translation

1. May auspicious powers or good thoughts (*bhadrā'h kra'tavah*) come (*ā' yantu*) to us (*nah*) from every quarter (*vis'v'atah*)—infallible (*a'dabdhāsah*), unhindered (*a'parītāsah*), forcing their way through [all obstacles] (*udbhi'dah*), so that (*ya'thā*) the Gods (*devā'h*) may always (*sa'dam i't*) be (*a'san*) for our increase (*vṛdhe'*)—unceasing (*a'prāyuvah*) protectors (*rakṣitā'rah*) day by day (*dive'-dive*).

2. May the gracious (*bhadrā'*)* good will (*sumati'h*) of the righteous (*ṛjūyatā'm*) Gods (*d'evā'nām*) come upon us ; may the bounty (*rāti'h*) of the Gods (*devā'nām*) descend upon (*abhi' ni' vartatām*) us (*nah*) ; we (*vaya'm*) have won (*u'pa sedima*) the friendship (*sakhya'm*) of the Gods (*devā'nām*) ; may the Gods (*devā'h*) extend (*pra' tirantu*) our (*nah*) days (*ā'yuh*) that we may live (*jīva'se*).

3. We (*vaya'm*) invoke (*hūmahe*) them (*tā'n*) with an old (*pū'rvayā*) hymn (*nivi'dā*)—Bhaga (*Bha'gam*), Mitra (*Mitra'm*), Aditi (*A'ditim*), Dakṣa (*Da'kṣam*), the unerring or friendly (*asri'dham*), Aryaman (*Aryama'ṇam*), Varuṇa (*Va'ruṇam*) Soma (*So'mam*) and the two Aśvins (*Aś'vi'nā*); may the gracious (*su-bha'gā*) Sarasvatī (*Sa'rasvatī*) grant (*karat*) us (*nah*) happiness (*ma'yah*).

---

* Or, may the gracious good will of the Gods and the bounty of the righteous Gods descend upon us.

4. May the wind (*vā'tah*) waft (*vātu*) to us (*nah*) that (*ta't*) wholesome (*mayo-bhu'*) medicine (*bheṣaja'm*), may mother earth (*mātā' pṛthivī'*) convey it (*ta't*) to us, may father Heaven (*pitā' Dya'uh*) convey it (*ta't*) to us, may the beneficial (*mayo-bhu'vah*) soma-pressing (*soma-su'tah*) stones (*grā'vāṇah*), convey it to us. O ye wise (*dhiṣṇyā*) As'vins (*As'vinā*), you two (*yuva'm*) listen (*s'ṛṇutam*) to it (*ta't*).

5. Him (*ta'm*), the ruler (*ā's'ānam*) of all that moves (*ja'gatah*), the master (*pa'tim*) of all that stands (*tasthu'ṣah*), the inspirer of thoughts (*dhiyaṃ-jinva'm*) we (*vaya'm*) invoke (*hūmahe*) for our protection (*a'vase*) so that (*ya'thā*) Pūṣā' (*Pūsā'*) may help (*a'sat*) in the increase (*vṛdhe'*) of our possessions (*nah ve'dasām*), our protector (*rakṣitā'*) and guard infallible (*pāyu'h a'dabdhah*) for our well-being (*svasta'ye*).

6. May Indra (*I'ndrah*) famed far and wide (*vṛddha'-s'ravāh*) bestow (*dadhātu*) well-being (*svasti'*) on us (*nah*); may Pūṣan (*Pūṣā'*) possessed of all riches (*vis'va'-vedāh*) bestow well-being (*svasti'*) on us (*nah*); may Tārkṣya (*Tā'rkṣyah*) whose fellies are never injured (*a'riṣṭa-nemih*) bestow well-being (*svasti'*) on us (*nah*); may Bṛhaspati (*Bṛ'haspa'tih*) bestow well-being (*svasti'*) on us (*nah*).

7. The Maruts (*Maru'tah*) with spotted steeds (*pṛ'ṣad-as'vāh*), with Pṛs'ni as their mother (*pṛ's'ni-mātarah*), marching in splendour (*s'ubhaṃ-yā'vānah*), visiting sacrifices (*vida'theṣu ja'gmayah*), the sons of Manu (*Ma'navah*) with Agni for their tongue (*Agni-jihvā'h*) and the sun for their eye (*sū'ra-cakṣasah*),—may all the Gods (*vi's've devā'h*) come (*ā' gaman*) to us (*nah*) here (*iha'*) with their protection (*a'vasā*).

8. Ye Gods (*devāh*) may we hear (*s'ṛṇuyāma*) with our ears (*ka'rṇebhih*) what is good (*bhadra'm*); ye adorable

ones (*yajatrāh*), may we see (*pas'yema*) with our eyes (*akṣa'bhih*) what is good (*bhadra'm*). Praising Gods (*tuṣṭuvā'ṃsah*) with firm (*sthira'ih*) limbs (*a'ṅgaih*) and bodies (*tanū'bhih*) may we attain (*vy-a's'ema*) the term of life (*vat' ā'yuh*) appointed by the Gods (*deva'-hitam*).

9. A hundred autumns (*s'ata'm i't nu' s'ara'dah*) stand before us (*a'nti*), O ye Gods (*devāh*), in which (*ya'tra*) ye have made (*cakra'*) infirmity (*jara'sam*) to descend on our bodies (*nah tanū'nām*), in which (*ya'tra*) the sons (*putrā'sah*) become (*bha'vanti*) the fathers (*pita'rah*); damage ye not (*mā' rīriṣata*) our term of life (*nah ā'yuh*) in the midst of its course (*ga'ntoh madhyā'*).

10. Aditi (*A'ditih*) is heaven (*dya'uh*), Aditi (*A'ditih*) is the aerial region (*anta'rikṣam*), Aditi (*A'ditih*) is the mother (*mātā'*), she is the father (*sa'h pitā'*), she is the son (*sah' putra'h*); Aditi (*A'ditih*) is all the Gods (*vi's've devā'h*) Aditi (*A'ditih*) is the five tribes (*pa'ñca ja'nāh*); Aditi (*A'ditiḥ*) is all that is born (*jāta'm*), Aditi (*A'ditih*) is all that is to be born (*ja'nitvam*).

Notes.

St. 1, p. 7 note 1. Of course, this is not acc. to the traditional interpretation of vi.4.86.

St. 2. The first half may be regarded as one sentence thus : देवानां भद्रा सुमतिः, ऋजूयतां देवानां रातिः [च] नः अभि नि वर्तताम्. In the second half उपसेदिम need not be taken in the sense of लिङ्. It is the perfect indicative—*we have won the friendship of the Gods* (by our noble way of life), and so we can hope that the Gods will prolong our lives.

St. 7. Skandasvāmin and others use वार्द्धक्य after the analogy of बाल्य, तारुण्य etc. The correct from is वार्धक. It is curious that most of the commentators have tripped over

the aorist 2nd pl. of हिन्स् which is रुधादिगणीय परस्मैपदी. In लोट् the form will be हिंस्त, in लुङ् with मा—हिंसिष्ट.

St. 8. व्यशेम—The root *as'* to reach, obtain, is Ubhayapadin. In the Sāma-veda and V. Saṁhitā we get the Atm. a-aor. cptative form: व्यशेमहि देवहितं यदायुः. "The active is usual with prepositions, and *vyas'ema* obviously prior to *vyas'emahi*". Bloomfield and Edgerton.

St. 8 p, 38. Even Haradatta has मृषीमहि with मा. This shows that माङि लुङ् is more honoured in the breach than in the observance in later times. This led Vāmana to distinguish between माङ् and मा—a distinction which is on a par with that between Tweedledum and Tweedledee.

St. 9. तच्चक्षुर्देवहितम्—The idea is developed in TA. iv. 42:

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतं
नन्दाम शरदः शतं मोदाम शरदः शतं
भवाम शरदः शतं शृणवाम शरदः शतं
प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं
ज्योक् च सूर्यं दृशे ।

पुरस्तात् पूर्वस्यां दिशि । उच्चरत् उदीयमानम् । शुक्रं भास्वरम् । देवहितं देवैः स्थापितम् । ज्योक् दीर्घं कालं सूर्यं दृशे द्रष्टुं प्रभवाम ॥

It is interesting to note that सूर्यमुच्चरन्तम् corresponds exactly to Gk. *he:lion ana-tellonta.*

In transliteration a colon after a vowel indicates that the vowel is long.

श्रीसदाशिवसमर्पणमस्तु